# अष्टमः सर्गः।

[1]पूर्वसर्गे अदृश्यस्यैव नलस्य मुखेन कन्यान्तः[पुर]-वर्तिनीं [2]दमयन्तीं देवीं नखादारभ्य केशपर्यन्तमेकैकमवयवं प्रति नवनवैरुक्तिविशेषैरुपवर्णितां कृत्वा नलमनसि आत्मनो दृश्यत्वा-भिप्राय[सङ्कल्प]विकल्पनमुपकल्प्य दमयन्तीदृग्गोचरं [3]वैरसेनिं प्रति प्रतीकं वर्णयिष्यन् [कविः]इमं सर्गमारभते।

अथाऽद्भुतेनाऽस्तनिमेषमुद्रमुन्निद्रलोमानममुं युवानम्।
दृशा पपुस्ताः सुदृशः समस्ताः सुता च भीमस्य महीमघोनः ॥१॥

[1]अथाऽद्भुतेनेत्यादि। ताः समस्ताः सभामध्य[2]गताः सुदृशः स्त्रियः अमुं युवानं नलम् उन्निद्रलोमानं रोमाञ्चितं दृशा पपुः। तथा महीमघोनो भीमस्य नृपस्य[3][च] सुता दमयन्ती तं दृशा पपौ। कथम्? यथा भवति अद्भुतेन आस्ता गता निमेषमुद्रा यत्र दर्शने निमेषरहितं पपुः। अथ[वा] दमयन्तीदर्शनात् निर्निमेषमिति नल-विशेषणम्। [उपजातिवृत्तम्][4] ॥१॥

कियच्चिरं दैवतयाचितानि निह्नोतुमेनं प्रभवन्तु[1] नाम।
पल्लवजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भः ॥२॥

1 B. add. इदानीमष्टमः सर्गः आरभ्यते।; P. ॐ नमः श्रीगणेशाय॥ 2 P. R. देवीं दमयन्तीं 3 R. वैरसेनिं॥ // 1 R. अथाद्भुतेनेति। 2 B. मध्ये 3 P. च वीरा दमयन्ती 4 P. adds. पपुरित्यत्र तिरस्कृतवाच्यो गुणीभूतभावोदयोऽनु-प्रासः ॥१॥ // 1 R. + ... खलु शकुवन्तु

सर्ग ८ 2

[1]कियच्चिरमित्यादि । नाम अहो दैवतानि भाषितानि एनं नलं निह्नोतुं [3]कियच्चिरं कियन्तं कालं [प्र]भवन्तु । देवता नामिमानि दैवतानि । अथ वा दैवतानि [पुंसि वेति] आम्नातस्याऽपि नपुंसक एव प्रयुज्यमानस्य दैवतशब्दस्य षष्ठ्याम् । दैवतानां भाषितानीति समासः । देवैरदृश्यमानत्वं दत्तम् । कियत्कालम् [4]अभिलक्षन्तु ।प। एनम् । [5]यत इओर्डिम्भः प्ररोहः पलालजालैस्तृणगोमयादिभिः [6]मिश्रैः पिहितोऽपि स्वयमेव प्रकाशं [7]प्राकट्यमासादयति । [8]हि यस्मात् [9]तथाऽयमपि दृष्टोऽभूत्[10] ॥२॥

अपाङ्गमप्याप दृशोर्न रश्मिर्नलस्य भैमीमभिलष्य यावत् ।
स्मराशुगः सुभ्रुवि तावदस्यां प्रत्यङ्गमापुङ्खशिखं ममज्ज ॥३॥

[1]अपाङ्गमित्यादि । यावन्नलस्य दृशोः रश्मिः भैमीमभिलष्य अपाङ्गमपि न आप तावत् स्मरस्य आशुगो बाणोऽस्यां सुभ्रुवि दमयन्त्याम् आपुङ्खशिखं प्रत्यङ्गं ममज्ज[2] ॥३॥

यदक्रमं विक्रमशक्तिसाम्यादुपाचरद्द्वावपि पञ्चबाणः ।
कथं न वैमत्यममुष्य चक्रे शरैरनर्द्धद्धिविभागभाग्भिः ॥४॥

[1]यदक्रममित्यादि । पञ्चबाणः यत् यस्मात् द्वावपि

---

2 1 P. कियच्चिरम; B कियच्चिरमीति । 3 B om. कियच्चिरं म B add. नल 5 B यथा 6 B मिथ्या 7 B प्राकाश्य° 8 P. B अतः 9 P. °यमदृष्टो° 10 B add. इति; P. add. एनं लघु शम्नुवन्तु पाठान्तरम् । दृष्टान्तः ॥२॥
1 P. अपाङ्ग; B अपाङ्गमपीति । 2 P. add. अतिशयोक्तिः ॥३॥
1 P. यद; B यदक्रममिति ।

सर्ग ८ 3

दमयन्तीनलौ अक्र(। ।८ व)मे युगपदुपाचरत् आरराध [2] । कस्मात् ? विक्रमशक्तेः साम्यात् । दमयन्त्यां नले च समां विक्रमशक्तिं प्रयोज्य परस्परानुरागं तुल्यं चक्रे । नल [इत्यध्याहारः] कथं पञ्चभिर्विषमैः शरैः अमुष्य वैमत्यं कामस्य विरुद्धमतित्वं न चक्रे [3] । यतः किंभूतैः ? न अर्द्धोर्द्धविभागं भजन्ते विषमत्वात् [तैः] । भजो ण्विः (पा° III.ii.62) । यदि [4] दमयन्त्यां त्रयो बाणाः क्षिप्यन्ते, तदा [5] नले [च] द्वौ शरौ । अथ [वा] वैपरीत्येन [6] नले त्रयो, भैम्यां तदा [7] द्वौ । अतो यतो वैमत्येन जातं तत्र विघ्नः । उत्तरवाक्ये यत्तच्छब्दप्रयो-गाय केचिदर्द्धद्वयं [8] वैपरीत्येन पठन्ति, तत्किं न वैमत्यम् [इत्यन्ये] [9] ॥४॥

---

तस्मिन्नलोऽसाविति साऽन्वरज्यत् क्षणं क्षणं क्वेह स इत्युदास्त ।
पुनः स्म तस्यां वलतेऽस्य चेतः पुनश्च दूत्येन बलाद्व्यवर्ति ॥५॥

---

तस्मिन्नित्यादि [1] । सा [2] तस्मिन् विषये [इति] अन्वरज्यत । कथम् ? असौ नल [3] इति क्षणं पश्चात् [नल] क्षणमेव स इह क्व इत्युदास्ते उदासीनाऽभूत् । अस्यापि नलस्य चेतः [4] पुनस्तस्यां देव्यां वलते स्म । पुनश्च दूत्येन दूतत्वेन [बलात्] चेतो व्यवर्ति । दूतात् यत् (सि° हैं° व्या° VII.i.63) इति [6] सूत्रेण यत् ॥५॥

---

2 I, I2 om. आरराध 3 I2 नल 4 I, I2 om. यदि 5 I, I2 om. तदा 6 I, I2 वैपरीत्यं 7 I, I2 om. तदा 8 I, पदद्वयं 9 I, add. अनुप्रासः ॥४॥

1 I, तस्मिन्न ; I2 तस्मिन्नलोऽसाविति । 2 I2 असौ 3 I, add. क्षणम् 4 I, चित्तं 5 I2 add. here उदोऽनूर्ध्वकर्मणि°... चेष्टायामिति from verse no. 7. 6 I, add. पाणिनीये ऽतिदूलवणिग्भ्यां यदिति वक्तव्यम् । (वा° 434) (नु औत्सुक्यमत्योरौत्सुक्यधृतेश्च शबलता ॥५॥

सर्ग ८ 4

तं वीक्ष्य काचित्कुब्जा ललज्जे कयाऽपि तद्भासि हृदा ममज्जे।
स्मरन्तमाशङ्कित काऽपि कन्या भेजे मनोभूवशभूयमन्या ॥६॥

तमिति। काचित् कुब्जा स्त्री तं नलं वीक्ष्य ललज्जे। कयाऽपि तद्भासि तस्य [भासि कमनीयतायां] प्रौढया स्त्रिया। हृदा ममज्जे। काऽपि कन्या [मुग्धा] तं स्मरमाशङ्कित। अन्या [मध्या] मनोभुवो वशभूयं भेजे। [भुवो भावे (पा० III.i.107) इति। [कया-चिदालोक्य नलं ललज्जे] इति वा पाठः ॥६॥

कस्त्वं कुतो वेति न शक्नुवत्यस्तं प्रष्टुमत्यप्रतिभातिभारात्।
उत्तस्थुरभ्युत्थितिवाञ्छयेव निजासनान्नैकरसाः कृशाङ्ग्यः ॥७॥

क इत्यादि। कृशाङ्ग्यः स्त्रियो नैकरसाः सत्यः निजासनात् अभ्युत्थितेः [अभ्युत्थानस्य] वाञ्छया इव उत्तस्थुः अभ्युत्थानं चक्रिरे। न तु अभ्युत्थितिवाञ्छया अभ्युत्थानं क्रियते। किमिति चिसं सत्यतो न एकरसाः सत्यः किन्तु अनेकरसभाजः सत्यः अभ्युत्थानं कृतवत्योऽपि अभ्युत्थितिवाञ्छया इव। एतेन अभ्युत्थानं कृतमपि अजानन्त्यः अभ्युत्थितिवाञ्छया इव उत्तस्थुः। यत एकरसाः एक एव रसः शृङ्गारो यासां तास्तथा। यः किल एकरसभाक्, सोऽन्यकृताकृतं न जानाति। उदोऽनूर्ध्वकर्मणि (पा० I.iii.24) इति ऊर्ध्व-

~~[illegible]~~ 1 P[1] कयाचि; P[2] तं वीक्ष्येति। 2 B कया नलम् आलोक्य ललज्जे 3 B P[1] आलोक्य 4 B भुवो भावे इति क्यप् here 5 P[2] om. कन्या 6 P[1] तं वीक्ष्य काचित्कुब्जा ललज्जे 7 P[1] add. अनुप्रासो जातिर्भावोदयश्च ॥६॥ 1 P[1] कस्त्वम्; P[2] कस्त्वं कुतो वेति। 2 B क्षणुकोदर्यः 3 P[1] P[2] om. अभ्युत्थानं ... न जानाति 4 B सत्यतो :

सर्ग ८ 5

कर्मणो विशेषणार्थम् ईहायामित्यो[6] इति वक्तव्यमुक्तम् । परं सत्यामपि ईहायामूर्ध्वं विशिष्ट[5]क्रियावत्त्वाद् आत्मनेपदाभावः । दुर्गसिंहोऽप्याह — (III.ii.11 [P.2.9]) उदोऽनूर्ध्वचेष्टायामिति । किं कुर्वन्त्य[6]: ? । अप्रतिभा[7] अतिमौग्ध्यं तस्याः अप्रतिभारात् अप्रतिभावात् त्वं नलम् इति प्रष्टुमपि अशक्नुवत्य: असमर्था[8]: । कथम् ? । इतीति[9] । हे पुरुष ! क: त्वम्[10] ? कुत: ?[11] वा कस्मादागत: ?[12] इति[13] तद्दर्शनादेव मूकत्वं जातम्, अप्रगल्भातिशयात्[14] ॥७॥

स्वाच्छन्द्यमानन्दपरम्पराणां भैमी तमालोक्य किमप्यवाप ।
महारयं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम् ॥८॥

स्वाच्छन्द्य[1]मित्यादि । भैमी[2] तं नलम् आलोक्य किमपि वक्तुम् अशक्यम् अनिर्वचनीय[3]म् आनन्दपरम्पराणां स्वाच्छन्द्यम् उद्रेक[4]मवाप । यथा निर्झरिणी नदी धाराधरस्य मेघस्य केलिकालमासाद्य वारां[5] पानीयानां महारयं वेगं प्राप्नोति ॥८॥

तत्रैव मग्ना यदपश्यदग्रे नास्या दृगस्याङ्गमपास्य दन्यत् ।
नादास्यदस्यै यदि कुण्डिधारां विच्छिद्य विच्छिद्य चिरान्निमेष: ॥९॥

तत्रैव[1] मग्नेत्यादि । अस्या[2] दृग् दृष्टि: अग्रे यत् अस्य नलस्य अङ्गं (प्रथम[3]) मपश्यत् दृष्ट (116b) वती । तत्रैवाङ्गे मग्ना सती

5 B °विशिष्टं 6 P2 कुर्वत्य: 7 P1P2 अप्रतिभाया; and om. अतिमौग्ध्यं 8 P1P2 om. असमर्था: 9 P1P2 add. किम् 10 P1P2 त्वं क: ।। B वा कुत: 12 P1P2 om. कस्मात् 13 P1P2 om. इति 14 P1 अप्रगल्भातिशयोक्ति: ॥७॥
1 P1 स्वाच्छन्द्यं; P2 स्वाच्छन्द्यमिति । 2 B भैमि 3 P1P2 om. अनिर्वचनीयम् 4 P1P2 om. उद्रेकम् 5 B वारं —॥८॥ 1 P1 तत्रैव; P2 अत्रैव मग्नेति । 2 P1 om. अस्य 3 P1 प्रथमं पश्य तत्रैवाङ्गे

सर्ग ८ 6

दृष्टिः अन्यत् द्वितीयमङ्गं न अपास्यत् । [अपास्यदिति पाठे न] [4]अगमिष्यत् । यदि निमेषो [5]मेषोन्मेषः अस्यै दमयन्त्यै चिरात् पूर्वां बुद्धिधारां [6] विच्छिद्य विच्छिद्य अन्यदङ्गं नाऽदास्यत् । पूर्वोद्दिष्टगतमेवाङ्गं कर्म । अथवा पूर्वां बुद्धिधारां [7]विच्छिद्य विच्छिद्य [धी]राधाहीकरानं /द्वि [8]विच्छिद्य विच्छिद्य नवां [9]नवबुद्धिधारां बुद्धिप्रवाहं [न] अदास्यत् । [नि]मेषे तु सति अन्यदङ्गं दृष्टवती, ~~...~~ [10]दृष्टेऽपि ॥९॥

दृशाऽपि साऽऽलिङ्गितमङ्गमस्य जग्राह नाऽग्रावगताङ्गहर्षैः ।
अङ्गान्तरेऽनन्तरमीक्षिते तु निवृत्य सस्मार न पूर्वदृष्टम् ॥१०॥

[1]दृशापीत्यादि । सा [2]दमयन्ती दृशा दृष्ट्या आलिङ्गितमप्यस्य अङ्गं नव्यं न जग्राह न ददर्श । [नाऽनुबभूव] कैः ? अग्रे प्रथमम् अवगतस्य गृहीतस्याऽङ्गस्य हर्षैः आनन्दैः । नूतनं न आददे । अनन्तरं पश्चात् चिरेण अङ्गान्तरे नूतनेऽङ्गे ईक्षिते गृहीते सति तु [3]पुनः निवृत्य व्यावृत्य पूर्वदृष्टम् अङ्गं न सस्मार । तदप्यतिसुचिरम् । ततः पूर्वदृष्टं विस्मृतवती ॥१०॥

हित्वैकमस्याऽवयवं विशन्ती तद्दृष्टिरङ्गान्तरमुक्तिसीमाम् ।
चिरं चकारोभयलाभलोभात् स्वभावलोला गतमागतं च ॥११॥

4 P1 add. अपास्यात् 5 P1 यत 6 P1P2 om. मेषोन्मेषः 7 P1 om. विच्छिद्य विच्छिद्य 8 P2 om. विच्छिद्य 9 B P1 नवनवां 10 P1 om. दृष्टेऽपि — ॥९॥
1 P1 दृशा ; P2 दृशाऽपि सेति । 2 P1P2 om. दमयन्ती 3 B निवृत्य ; P2 om. व्यावृत्य M B ततः at the end — ॥१०॥

हित्वैकमित्यादि[1]। तस्या[2] दमयन्त्या दृष्टिरस्य नलस्य[3] एकमपघनम् अङ्गं हित्वा त्यक्त्वा अङ्गान्तरस्य भुजेः सीमां मर्यादां[4] विश्रान्ती सती चिरं गतमागतं गमनागमनं[5] चकार। कुतः? उभयस्य पूर्वदृष्टस्य द्रक्ष्यमाणस्य चाङ्गस्य लोभिलोभात्[6]। यतः अविमोवल्लोल्या। लोलशब्दः ...[7] ॥११॥

निरीक्षितं चाङ्गमवीक्षितं च दृशा पिबन्ती रभसेन तस्य।
समानमानन्दमियं दधाना विवेद भेदं न विदर्भसुभ्रूः ॥१२॥

निरीक्षितमित्यादि[2]। इयं विदर्भसुभ्रूः रभसेन दृशा कृत्वा निरीक्षितं चाङ्गम् अवीक्षितं[3] च तस्याङ्गं पिबन्ती सती उभयोरङ्गयोर्भेदं न विवेद। किं कुर्वाणा? समानमानन्दं दधाना[4]। अङ्गमिदं पूर्वदृष्टम् इदं[5] द्रक्ष्यमाणम् इति भेदम् नाऽजानात्। तुल्येनैवाऽऽनन्देन[6] ॥१२॥

सूक्ष्मे घने नैषधकेशपाशे निपत्य निःस्पन्दतरोभवच्छ्याम।
तस्यानुबन्धं न विमोच्य गन्तुमपारि तल्लोचनखञ्जनाभ्याम् ॥१३॥

सूक्ष्मे[1] इत्यादि। तस्या[2] लोचने एव खञ्जनौ पक्षिविशेषौ ताभ्यां तस्य[3] केशपाशस्य अनुबन्धं विमोच्याऽनुगतं सम्बन्धं विमोच्य

1 P1 हित्वै; P2 हित्वैकमस्येति। 2 P1 P2 om. दमयन्त्या 3 P2 om. नलस्य 4 P1 P2 om. मर्यादां 5 P1 P2 om. गमनागमनं 6 B लोभा॰ 7 P1 add. अनुप्रासो जातिः पर्यायः काव्यलिङ्गं च ॥११॥ 1 P2 hear स्वाङ्ग॰ 2 P1 निरीक्षि; P2 निरीक्षितमिति। 3 P1 om. अवीक्षितं च 4 B दधती 5 P1 om. इदं 6 P1 add. अनुप्रासोऽतिशयोक्तिः काव्यलिङ्गं च ॥१२॥ 1 P1 सूक्ष्मे; P2 सूक्ष्मे घने इति। 2 P1 तस्या ... किं कुर्वञ्च्छ्यामौ ... ...भवच्छ्याम। 3 P2 om. केशपाशस्य ...... नैषधस्य

सर्ग ८ 8

गन्तुं न अपारि न शेके। किं कुर्वद्भ्याम्? सूक्ष्मे घने निबिडे नैषधस्य केशपाशे निपत्य निःस्पन्दतरीभवद्भ्याम्[4]। अथ च दृढे सूक्ष्मत्वाद्दृश्ये केशानां पाशे[5] बन्धने पतितौ निश्चलीभूतौ[6] पक्षिणौ तस्य अनुबन्धं पाशबन्धं मोचयित्वा [गन्तुं] न शक्नुतः[7] ॥१३॥

---

भूलोकभर्तुर्मुखपाणिपादपद्मैः परीरम्भमवाप्य तस्य ।
दमस्वसुर्दृष्टिसरोजराजिश्चिरं न तत्याज सगन्धबन्धम् ॥१४॥

---

भूलोकभर्तुरित्यादि[1]। दमस्वसुर्दृष्टिरेव सरोजराजिः चिरं सगन्धस्य सगोत्रस्य बन्धं[2] सम्बन्धं न तत्याज। किं कृत्वा? तस्य भूलोकभर्तुर्मुखेन पाणिभ्यां[3] च पादाभ्यां च एवैः पद्मैः सह परीरम्भम्[4] अवाप्य। मुखादिसम्बन्धभेदेन व्यापारभेदात् दृष्टेरम्भ राजित्वम्[5] ॥१४॥

---

तत्कालमानन्दमयी भवन्ती भवत्तरानिर्वचनीयमोहा ।
सा मुक्तसंसारिदशारसाभ्यां द्विस्वादमुल्लासमभुङ्क्त मृष्टम् ॥१५॥

---

तत्कालमित्यादि[1]। सा मृष्टम् उल्लासम् आनन्दम् अभुङ्क्त। किंभूतम्? मुक्तानां दशा अवस्था तथा[2] संसारिणां दशा[3]

---

4 B निष्पन्द० 5 B बन्धने पाशे 6 P. add. खञ्जनौ 7 P. add. निःस्पन्दतराभ्यामिति पाठान्तरम्। रूपकं श्लेषश्च ॥१३॥

1 P. भूलो; P2 भूलोकभर्तुरिति। 2 P. सम्बन्धबन्धं 3 P. पादाभ्यां पाणिभ्यां च 4 B परि० 5 P. add. मुखपाणिपादमेव पद्मानि। अनुप्रासो रूपकं समासोक्तिश्च ॥१४॥

1 P2 तत्कालमिति। 2 P. om. तथा 3 P. add. अवस्था

उभयो रसाभ्यां [द्विस्वादं] द्विविधः स्वादो यस्य आनन्दस्य तं तथा। किंभूता? । तत्कालम् आनन्दमयी भवन्ती। इयं मुक्तदशा। तथा [भवन्तर :] अनिर्वचनी(7 व)नीयः मोहो यस्याः सा तथा। इयं[5] संसारिदशा। तद्दर्शनात् क्षणेन[6] आनन्दः[7] क्षणेन मोहश्च[8] ।।१५।।

---

दूते नलश्रीभृति भाविभावा कलङ्किनीयं जनि मेति नूनम्।
न स व्यधान्नैषधकायमायं विधिः स्वयं दूतमिमां प्रतीन्द्रम्।।१६।।

---

दूते[1] नलेत्यादि। नूनम् इत्यहं मन्ये। स विधिः इमां दमयन्तीं प्रति इन्द्रं स्वयमेव साक्षादेव नैषध[2]काया[3]स्य नल- शरीरस्य माया यस्य सं तथा नैषधकर्मकः कायमायां कृत्वा दूतं न व्यधात्। स्वयं च[4] दूत इति नायं[5] भेदः। नैषधशरीरस्य माया यस्य तं तथा। कथम्? । इति कारणात्। इतीति[6] किम्? । इयं दमयन्ती नलश्रीभृति दूते भाविभावा सती। भावी[7] भविष्यन् भावो यस्याः सा तथा। सकामा सती[8] इन्द्रे[9] वर्तमाना[10] कलङ्किनी[11] कलङ्कयुक्ता मा जनि मा भवतु[12] ।।१६।।

---

पुण्ये मनः कस्य मुनेरपि स्यात् प्रमाणमेनस्यपि दृश्यवृत्तिः।
तच्छ्रान्ति चित्तं परमेश्वरस्तु भक्तस्य हृष्यत्करुणो गृणाद्धि ।।१७।।

---

4 P1 तयोः; P2 om. उभयोः... मुक्तदशा। 5 P1P2 om. इयं संसारिदशा 6 P1 क्षण एव। तस्मिन्नानन्दक्षणे मोहश्च। 7 P2 om. आनन्दःक्षणेन 8 P1 add. भावोदयोऽतिशयोक्तिश्च ।।१५।। 1 P1 दूते नले।; P2 दूते नलश्रीति। 2 P1P2 om. नैषध०... नैषधकर्मकः 3 B P2 ०मायं 4 P1P2 om. च 5 P1P2 नायक० 6 P1 इति किम्? । 7 P1P2 om. भावी... स तथा 8 P1P2 om. सती 9 B इन्द्र०; P1 om. इन्द्रे 10 P1 add. सती 11 P1P2 om. कलङ्किनी 12 P1 add. संव्यधादिति पाठे इन्द्रस्य स्वयं दूतत्वविधानं नाकार्षीत्। निदर्शनमुत्प्रेक्षानुप्रासोऽपि ।।१६।।

पुण्ये[1] इत्यादि। कस्य मुनेरपि मनः पुण्ये प्रमाणं स्यात्। अपि[2] तु न कस्यापि। यतः[3] किंभूतम्? तनस्यापि पापेऽपि दृष्टप्रवृत्ति दृष्टव्यापारम्। तु पुनः परमेश्वरः[4] श्रीपुराणपुरुषः भक्तस्य सेवकस्य चित्तं[5] मनः तच्छिन्दन्ति पापं[6] चिनत्ति। तत्पापं चिन्तयन्तीत्येवंशीलं तत् तच्छिन्दन्ति सत् [पापचिन्तनपरं [सत्] रुणद्धि निवारयति। /त [पापानीति पाठे भक्तस्य चित्तं पापानि रुणद्धि। अकथितं चेत् पा० I. iv.51 इति चित्तस्य कर्मसंज्ञा[7]]] किंभूतः? कृष्यत्करुणः भक्तेषु दयापरः। तस्माद् दमयन्तीचित्तं पुण्यकारित्वात् इन्द्रे इते सति सकामं न भविष्यतीति न मन्तव्यम्। यतो मुनीनामपि मनः पापं करोति। किं पुनस्तस्याः ॥१७॥

---

साऽलीकदृष्टे मदनोन्मदिष्णुर्यथाऽऽप शालीनतया न मौनम्।
तथैव तथ्येऽपि नले न लेभे मुग्धेषु कः सत्यमृषाविवेकः ॥१८॥

---

साऽलीकदृष्टे[1] इत्यादि। यथा साऽलीकदृष्टे नले शालीनतया सलज्जतया[2] मौनं न आप। शालीनकौपीने अधृष्टाकार्ययोः (पा० V.ii.20)। यतो मदनेन उन्मदिष्णुः ग्रथिता[3]। ततो लज्जा गता[4]। तथैव तस्मिन् नले तथ्येऽपि सत्येऽपि पुरोवर्तिनि सति मौनं न लेभे। यतो मुग्धेषु विषये इदं सत्यं इदं मृषा इति विवेको नास्त्येव। तस्माद् वक्तुं प्रारेभे। [शालीनतमेति पाठान्तरम्]॥१८॥

---

1 P1 पुण्ये; P2 पुण्ये नमे इति। 2 P1 P2 om. अपि ... कस्यापि। 3 P1 P2 om. यतः 4 P1 P2 शस्तो 5 P2 om. मनः ... चित्तं 6 P1 P2 om. पाप० ... शीलं तत् 7 P2 adds तच्छिन्नन्तीति (?) पाठे भक्तस्य चित्तं तच्छिन्दन्ति सत् पापचिन्तनपरं छि सत् रुणद्धि निवारयति ॥१७॥ 1 P1 साली; P2 सालीकदृष्टे इति। 2 P2 सलज्जया 3 P2 ग्राहिता 4 P2 शालीनतमेति पाठान्तरम् here. — ॥१८॥

सर्ग ८ 11

अथ स्वरेणैव विभावयन्ती भावं निजं सा मृदुगद्गदेन।
सखीचये साध्वसबद्धवाचि स्वयं तमूचे नमदाननेन्दुः॥१९॥

अथ[1] स्वरेणेत्यादि। अथ सा स्वयं[2] तं नलम् ऊचे। किंभूता? लज्जावशात् नमत् आननमेव इन्दुर्यस्याः सा तथा। क्व सति? सखीनां चये साध्वसेन बद्धवाचि मौनिनि सति। किं कुर्वती? स्वरेणैव निजं भावमभिलाषं विभावयन्ती ज्ञापयन्ती[3]। किंभूतेन? मृदुना गद्गदेन च॥१९॥

नत्वा शिरोरत्नरुचाऽपि पाद्यं सम्पाद्यमाचारविदातिथीनाम्।
उक्त्याऽपि युक्ता मधुपर्कतृप्तिर्न तद्गिरस्त्वादृशि धृष्टता मे॥२०॥

नत्वा[1] शिर इत्यादि। आचारविदा जनेन अतिथीनां शिरसो रत्नानां रुचा कान्त्याऽपि नत्वा प्रणामपूर्वकं[2] पाद्यं पादशौचोदकं च सम्पाद्यम्[3]। तथा उक्त्या मधुरालापेनाऽपि मधुपर्कस्याऽपि तृप्तिर्युक्ता कर्तुमुचिता। तत्तस्मात् त्वादृशि विषये मे[4] मम गिरो वाण्या न धृष्टता न[5] प्रागल्भ्यम्। तथा चोक्तम्[6]—तृणानि भूमिरुदकं चतुर्थी वाक् सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥(मनु III. 101)॥ एषामभावेऽपि एभिरेतदर्थः कार्यः इत्यर्थः।

1 I. अथ ॥; I2 अथ स्वरेणैवेति। 2 I1 om. तं 3 I2 om. ज्ञापयन्ती —॥१९॥
1 I1 नत्वा॥; I2 नत्वा शिर इति। 2 I1 ०पूर्विकया I2 ०पूर्वकया 3 I2 add. सम्पादनीयम् 4 I2 om. मे 5 I2 om. न प्रागल्भ्यम् 6 I1 om. तथा चोक्तम्... इत्यर्थः॥; I2 om. तथा चोक्तम्... याज्ञवल्क्यस्मृतेः।

तथा — अप्रणोद्योऽतिथिः सायमपि वाग्भूस्तृणोदकैरि (मनु० III.105)
ति याज्ञवल्क्यस्मृतेः (आचार० 107) ॥२०॥

---

स्वात्माऽपि शीलेन तृणं विधेयं देया विहायाऽऽसनभूर्निजाऽपि।
आनन्दबाष्पैरपि कल्प्यमम्भः पृच्छा विधेया मधुभिर्वचोभिः ॥२१॥

---

स्वात्मापीत्यादि। शीलेन सत्स्वभावेन कृत्वा स्वात्माऽपि आत्मशरीरं सुजनेन तृणप्रायं विधेयं तथा विहाय त्यक्त्वा निजाऽपि आसनस्य भूः भूमिर्देया। किञ्च दर्शनात् जातैरानन्दबाष्पैरप्यम्भोऽर्घोदकं कल्प्यम्। मधु (117b) भिर्मधुतुल्यैर्वचोभिः स्वागतादिपृच्छा अतिथेः विधेया। यतः तृणानि भूमिरित्यादि स्मरणात् ॥२१॥

---

पदोपहारेऽनुपनम्रताऽपि सम्भाव्यतेऽपां त्वरयाऽपराधः।
तत्कर्तुमर्हञ्जलिसज्जनेन स्वसम्भृतिः प्राञ्जलताऽपि तावत् ॥२२॥

---

पदोपहार इत्यादि। अतिथेः पदयोरुपहारनिमित्तं प्रक्षालनार्थं त्वरया अपां पानीयानां या अनुपनम्रता अनुपढौकनं साऽपि अपराधः सम्भाव्यते। तत्तस्मात् साधुना स्वस्याऽऽत्मनः सम्भृतिरुपढौकनं तया कृत्वा प्राञ्जलताऽपि कर्तुम् अर्हा योग्या

---

7 l. स्मरणम्। v.v.l. प्रियाञ्जलीविसचारयाऽपि वैधी विधेया मधुपर्कतृप्तिरिति पाठान्तरम् l; l2 v.v.l. तृप्तिरिति पाठान्तरम् ॥२०॥
1 l. स्वात्मा l; l2 स्वात्मापीति। 2 l2 यथा 3 l2 मुक्त्वा 4 B कल्पम 5 l2 om. मधुभिः 6 B विधेया अतिथेः 7 l. l2 complete verse here 8 l. l2 स्मृतिः ॥२१॥
1 B पादोप०; l. पदे l; l2 पदोपहारे इति। 2 B पादयो०; l. v.v.l. उभयोः 3 l. सम्भृति

तावत्। केन[4]?। अञ्जलिसञ्जनेन अञ्जल्याः सञ्जनं बन्धनं तया कृत्वा आत्म[नः] उपढौकनं प्राञ्जलत्वं कर्तुम् अर्हो। तेन पुरुषेण तावत् कर्तव्या त्वया। सहर्षत्वं दर्शनीयमेव। केन?। अञ्जलेः कर-सम्पुटस्य सञ्जनेन[5] संयोजनेन प्राञ्जलो[6] मधुरवागुरवाऽुच्यते। अथ[7] च आत्मनो[8]पढौकनेन प्रकृष्टोऽञ्जलिर्यस्य स प्राञ्जलिस्तस्य भावः तत्ता। राजादेरा[9]कृतिगणत्वाददन्तता। अत्र प्राञ्जल[10]शब्दैकदेश-रूपेणाऽपि जलादि[11]सम्पत्तिः कार्येत्यर्थः ॥२२॥

---

पुरा परित्यज्य मयाऽत्य[1]सर्जि स्वमासनं तत्किमिति क्षणं न।
अनर्हमप्येतदलङ्क्रियेत प्रयातुमीहा यदि चा[2]ऽन्यतोऽपि ॥२३॥

---

[3]पुरेत्यादि। मया पुरा[4] प्रथमं स्वमासनं[5] परित्यज्य तुभ्यमत्यसर्जि दत्तम्[6]। तत्किमिति एतदनर्हमपि तथा[7]ऽनुचितमपि। अथ वा[8] स्त्रीसम्बन्धित्वेन अयो[9]ग्यमपि न अलङ्क्रियेत[10]। त्वया यदि वा [यदि] च तवाऽन्यतोऽपि अन्यत्र प्रयातुम् ईहा इच्छा वर्तते तथाऽपि क्षणमुपविश ॥२३॥

---

निवेशितौ हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम्।
पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥२४॥

---

4 Pl Pz om. केन?।... तावत् 5 Pl सर्जनेन 6 Pz om. प्राञ्जलो ... अत्र 7 B वा 8 Pl चात्मोप° 9 B राजादि° 10 B प्राञ्जलि° 11 Pl Pz जलसम्पत्तिः —॥२२॥
1 Pz त्यक्त्वा व्यसर्जि 2 Pz त्यक्त्वा वान्यतोऽपि 3 Pl पुरः।; Pz पुरा
परित्यज्येति। 4 Pl पुरः 5 B स्वासनं 6 Pl add. पुरः पाठान्तरम्। 7 B तथा 8 B च 9 Pl अपोढ°; Pz योग्य° 10 BPl न क्रियते — ॥२३॥

सर्ग ९ 14

निवेधितामिति। हन्त खेदे। निवेदितां कथ्यतां ते तव कुच्छदयं निःकृपं मनः इमौ पादौ कियद्दूरं प्रयासे [निधित्सते] निधातुमिच्छति। किं कुर्वन्तौ ? । शिरीषपुष्पस्य कोषो मुकुलस्तस्य म्रद्विम्नो अभिमानं समापयन्तौ जयन्तौ। भवता कियद्दूरं गन्तव्यम् ॥२४॥

अनायि देशः कतमस्त्वया स वसन्तमुक्तस्य दशां वनस्य।
त्वदाप्तसङ्केततया कृतार्थां श्रव्यापि नाऽनेन जनेन संज्ञा ॥२५॥

अनायीत्यादि। त्वया स कतमो देशः वसन्तेन मुक्तस्य वनस्य दशां दुरवस्थाम् अनायि? कुतः त्वमागतः? । वसन्तरहितं वनं विधायं भवति। किञ्च अनेन मल्लक्षणेन जनेन संज्ञाऽपि नामाऽपि किं न [श्रव्या न] श्रोतुं योग्या। किंभूता? । त्वयि विषये आप्तः सङ्केतो यया सा तथा तस्या भावस्तत्ता तया कृत्वा कृतार्था। यन्नाम त्वयि सङ्केतितं तदेव कृतार्थम्। स्वं नाम कथयेत्यर्थः। [सङ्केतश्च] यद्यपि अर्थक्रियाकारितया प्रवृत्ति[निवृत्ति]योग्या व्यक्तिरेव। तथाप्यानन्त्याद् व्यभिचारात् तत्र सङ्केतं कर्तुं न युज्यते। गौः शुक्लश्चलति डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति तदुपाधावेव सङ्केतः। उपाधिश्च वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च। वस्तुधर्मो द्विविधः - पदार्थः प्राण[प्रद]त्वो[विरोधाधान]हेतु स्वरूपो जातिगुणरूपः। [सिद्धः] पूर्वापरीभूतक्रियारूपः। साध्यः डित्थादिशब्दानां संहृतक्रमस्वरूपम् अन्त्य-

1 P. निवेधा 2 P. add. इति 3 P2 om. कथ्यतां 4 B ०कृतं 5 B प्रायासे 6 P2 कुर्वतौ 7 P2 ०कुसुमस्य 8 B कोशो; P2 om. कोषः 9 P. कुड्मल० 10 P. om. भवता — ॥२४॥ 1 P. अना; P2 अनायि देश इति 2 B योग्यम् 3 B ०प्यानन्त्यव्यभि० 4 B सङ्केतः; P2 सङ्केत 5 P. ०भागो 6 P. om. इति 7 P2 तदुपाध्या० 8 B विप्रकाष्ठो 9 P2 पादार्थ० 10 B संहृत; B P2 ०क्रमं; edn. क्रम०

सर्ग ८ 15

बुद्धिनिग्राह्यं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन निवेश्यते। स संज्ञारूपयदृच्छात्मक इति गौः शुक्लश्चलति डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति [1] इति महाभाष्यकारः। इत्यादिना प्रदर्शितः[12] सङ्केतितः चतुर्भेदो जात्यादिरिति [काव्य प्र. १०] इति मतम्। एतच्च ग्रन्थकारेण सूत्रितम्। तत्रैव[13] हि संज्ञासङ्केतविषयः जातिरेव वा [1]

इति तु मते संज्ञाशब्देन संज्ञात्वं लक्ष्यते। तत्र हि मते क्रिया-[14]गुणद्रव्य[15]यदृच्छास्वपि जातिरेव सङ्केतविषय [1] इति[16] ॥२५॥

तीर्णः किमर्णोनिधिरेव नैष सुरक्षितेऽभूदिह यत्प्रवेशः।
फलं किमेतस्य तु साहसस्य न तावदद्यापि विनिश्चिनोमि ॥२६॥

तीर्ण[1] इत्यादि। त्वया किम् एष[2] अर्णोनिधिः समुद्र एव न तीर्णः? यत् इह सुरक्षिते प्रदेशे प्रवेशोऽभूत्। तु पुनरेतस्य[3] तव साहसस्य किं फलं भविष्यतीति तावदद्याप्यहं न विनिश्चिनोमि ॥२६॥

तव प्रवेशे सुकृतानि हेतुर्मन्ये मदक्ष्णोरपि तावदत्र।
न लक्षितो रक्षिभिर्यदाभ्यां जितोऽसि धन्वा जितपुष्पधन्वा ॥२७॥ त

तव[1] प्रवेशे इत्यादि। तवाऽत्र प्रवेशे[2] ममाक्ष्णोः वे सुकृतान्यपि तावत् हेतुः कारणम्। लक्ष्यः विचार्यः। एकमिदमपि

॥ 1. इत्यादि० । 2 B प्रदर्श्य । 3 P2 om. हि । 4 P1 P2 गुणक्रिया० 5 P1 P2 om. द्रव्य० 16 P2 इव —— ॥२५॥
1 P1 तीर्णः; P2 तीर्णः किमर्णोनिधिरेव। 2 B P1 एषो० 3 P2 न च —— ॥२६॥
1 P1 तव प्रवेशे; P2 तव प्रवेशे इति। 2 P1 मद० ~~[struck]~~ ——

कारणं [हेतुर्मन्ये।[3] मुच्ये इति पाठान्तरम्।[4] मन्ये इत्युत्प्रेक्षा-व्यञ्जकम्।[5] अथ स्वमतदार्ढ्योपपादनाय[6] प्रयुक्तं वाक्यान्तर-मतो गर्भितम्[7]अपि वाक्य[8]गुण एवेति।[9]] यस् त्वम् आभ्यां नेत्राभ्यां सखीभिर्भर्तुर्न लक्षितः। अदृष्ट एव सन् प्रीतोऽसि दृष्टः॥ किं भूतः?॥ तन्वा शरीरेण जितः पुष्पधन्वा येन[10] स तथा॥ [धनुषश्च" (पा॰ V.iv.132) इत्यनङ्। स च, "ऊदनोः (पा॰ I.i.53)" इति अन्त्या-न्त्यस्य भवति।] अतिसुन्दरो हि अन्तःपुरान्तर्हन्यते एव॥२७॥

---

यथाकृतिः काञ्चन ते यथा वा दौवारिकान्धंकरणी च शक्तिः।
कुच्यो कुचीभिर्जितकाञ्चनाभिस्तथासि पीयूषभुजां सनाभिः॥२८॥

---

यथाकृतिरित्यादि।[1] यथा ते तव काञ्चन अपूर्वा आकृतिः यथा वा दौवारिकाणां प्राहरिकाणाम् अन्धंकरणी[2] च[3] अदृश्यत्वकारिका च शक्तिः। तथा तेन[4] त्वं कोऽपि पीयूष-भुजां देवानां सनाभिः सगोत्रः। किंभूतः?। जितं काञ्चनं याभि-स्ताभिस्तथाविधाभिः[5] कुचीभिः[6] कान्तिभिः कुच्यः मनोज्ञः[7]॥२८॥

---

न मन्मथस्त्वं स हि नास्ति मूर्तिर्न चाश्विनेयः स हि नाद्वितीयः।
चिह्नैः किमन्यैरथवा तवेयं श्रीरेव ताभ्यामधिका विशेषः॥२९॥

---

3 Pı मन्ये 4 Pı P2 om. मन्ये; edi. add. मन्ये 5 Pı व्यञ्जकम् 6 Pı पपादानाय 7 P2 om. अपि 8 P2 om. वाक्य॰ 9 Pı om. एवेति 10 B एन ॥ Pı ऊदनोः अत्वादन्त्यलोपोऽन्त्यस्य धनुषश्च इति अनङ् ॥२७॥

1 B यथाकृतीत्यादि; Pı यथाकृ। 2 Pı अन्ध॰ 3 Pı वा 4 Pı add. प्रकारेण; P2 add. कारणेन 5 P2 om. तथा 6 B कुचिभिः 7 B मनोज्ञः ॥२८॥

सर्ग ८ 17

न[1] मन्मथ इत्यादि। त्वं लोचनमन्मथो न भवसि। हि यस्मात् स नास्ति अविद्यमाना मूर्तिर्यस्य स तथा। अनङ्गः। [अस्तिक्षीरादिषु वचनमि(cf. under Vārt II.ii.24)ति बहुव्रीहिः। तथा] आश्वि-[2]नेयोऽपि त्वं न। हि यतः स [न अद्वितीयः। एकाकी न चरति। अश्विनीकुमारौ मिलिताविव सञ्चरतः। अथवाऽन्यैश्विसै-लक्षणैः किं कार्यम्।] तव इयं ताभ्यां] कन्दर्पाश्विनीकुमाराभ्यां सकाशात् अधिका श्रीरेव शोभैव विशेषः॥२९॥

---

आलोकतृप्तीकृतलोक! यस्त्वामसूत पीयूषमयूखमेनम्।
कः स्पर्द्धितुं धावति साधु सार्द्धमुदन्वता नन्वयमन्ववायः॥३०॥

---

आलोकेत्यादि[1]। हे आलोकेन दर्शनेन तृप्तीकृता लोका येन तस्य सम्बोधनम्। योऽन्ववायो वंशः एनं त्वां पीयूषमयूखं चन्द्रमसूत सोऽयं कः अन्ववायः साधु[2] सम्यक् ~~ननु~~ ननु प्रश्ने उदन्वता समुद्रेण सार्धं स्पर्द्धितुं[3] धावति। चन्द्रोऽपि आलोकेनोद्योतेनाऽभिनन्दितो लोकः॥३०॥

---

इतीरयन्ती नलसुन्दरं तं मत्वाऽमरं रुक्मिजनाभिबन्धात्।
आतिथ्यचाटून्युपदिश्य तस्यां श्रियं प्रियस्यास्तुत वस्तुतः सा॥३१॥

---

इतीरयन्तीत्यादि[1]। सा तं[2] नलवत्सुन्दरं रुक्मिणा

---

1 P: न मन्मथः; R न मन्मथ इति। 2 B आश्विनेयो —— ॥२९॥
1 B आलोक्य॰, P आलो॰; R आलोकेति। 2 BR साधु... प्रश्ने ... धावति 3 B स्पर्द्धितुं 4 B ॰नोत्पदयते जनानामानन्दम्॥३०॥
1 R इतीरा; R इतीरयन्तीति। 2 BR तु ——

जनानाम् अक्षिबन्धात् अदृश्यतया अमरं देवं मत्वा इति पूर्वोक्तम् ईरयन्ती सती[3] आतिथ्यार्थं चाटूनि प्रियवाक्यानि उपदिश्य व्याजेन [तम्] अस्तुत। पुनः सा वस्तुतः परमार्थतस्तु[4] तस्मिन् नल-सदृशे[5] स्थितां प्रियस्यैव नलस्य श्रियं शोभाम् अस्तौत्। अतिथिः स्वैः किल चाटुवाक्यैरानन्दनीयः। [अथवा तममरं मत्वा ईरयन्तीति पूर्वार्द्धं एव तामिति पदं योजयित्वा आतिथ्यचाटुव्याजेन वस्तुत-स्तत्स्थां प्रियस्य श्रियमस्तुतेत्येकवाक्यतया व्याख्येयम्]॥३१॥

---

वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्।
खलत्वमल्पीयसि जल्पितेऽपि तदस्तु बन्दिभ्रमभूमितैव ॥३२॥

---

वाग्जन्मेत्यादि[1]। चेत् यदि गुणैः सौन्दर्यादिभि-रद्भुते वस्तुनि दृष्टे सति मौनिता क्रियते तदा वाचो जन्मनो यद् वैफल्यम् असह्यं [तत्] शल्यं चेति कर्मधारयः। अथवा बहुव्रीहिः,-असह्यं शल्यं यस्य तत्तथा भवति[2]। ब्रह्मणा तर्हि मुखे वाणी विफला किमर्था[3] सृष्टा इति शल्यं तथा अल्पीयसि स्तोके जल्पितेऽपि खलत्वं दुर्जनत्वं भवति। तत्तस्मात् बन्दिनो[4] मागधस्य [5]भ्रान्तेर्भ्रमस्य भूमिता एवाऽस्तु। ममाऽपि इयं बन्दिनी काचित् या इत्थं वर्णनं कुरुते इति भ्रान्तेः[7] स्थाने अहं भवामि[6]॥३२॥

---

3 P. अस्तुत here M P. P2 om. तु 5 P. ०सन्निभे —॥३१॥

1 P. वाग्जन्म।; P2 वाग्जन्म वैफल्यमिति। 2 P. om. भवति 3 P. किमिति 4 P. बन्दि 5 P. add. स्तावकस्य 6 P. भ्रमस्य 7 P. add. विभ्रमस्य वा 8 P. add. अनुप्रासः काव्यलिङ्गं च ॥३२॥

सर्ग ८ 19

कन्दर्प एवेदमविन्दत त्वां पुण्येन मन्ये पुनरन्यजन्म।
चण्डीशचण्डाक्षिहुताशकुण्डे जुहाव यन्मन्दिरमिन्द्रियाणाम् ॥३३॥

[1] कन्दर्प एवेत्यादि। अहमेवं[2] मन्ये। कन्दर्प एव त्वां [3] त्वल्लक्षणम् [4] इदं पुनः अन्यजन्म जन्मान्तरम् अविन्दत अलभत। पुण्येन अतीतजन्मार्जितेन कामदेवकृतेन। तदेव पुण्यं दर्शयति-यदिन्द्रियाणां (॥8b) मन्दिरं शरीरं चण्डीशस्य श्रीमहादेवस्य[5] चण्डं यदक्षि तृतीयनयनं[6] तदेव हुताशकुण्डं[7] [तत्र] जुहाव। तेन त्वं[8] काम एव जातः॥३३॥

शोभायशोभिर्जितशैवशैलं करोषि लज्जागुरुमौलिमैलम्।
दस्रौ हठश्रीहरणादुदस्रौ कन्दर्पमप्युज्झितदर्परूपम् ॥३४॥

[1] शोभायशोभिरित्यादि। हे पुरुष! त्वम् ऐलं[2] पुरुरवसम् इलायाः पुत्रं लज्जाभरेण गुरुर्मौलिर्यस्य तं तथाविधं, जितत्वा-न्नम्रशिरसं करोषि॥ किंभूतम्॥ शोभायाः सौन्दर्यस्य यशोभिर्जितः शैवशैलः कैलासो येन तं तथा। त्वं दस्रौ अश्विनीकुमारौ[3] अपि हठेन श्रियः शोभायाः हरणात् उत्कृष्टान्यस्राणि ययोस्तौ तथा करोषि। यस्य श्रीर्गृह्यते स रोदिति। [तथा] कन्दर्पमपि त्वम् उज्झितो[4] रूपस्य दर्पो येन तं तथा करोषि। एभ्यः सर्वेभ्योऽपि सकाशात्त्वं रम्यः[5] ॥३४॥

1 R कन्दर्प। ; R कन्दर्प एवेति। 2 l. R क. एवं 3 R क. त्वल० h l. क. इदं
5 B श्रीमहेशस्य 6 B तृतीयं 7 l. हुताशन० 8 R कामस्त्वमेव —— ॥३३॥
1 l. शोभा। ; R शोभायशोभिरिति। 2 B ऐलं 3 l. R अश्विनावपि 4 l. उज्झित-रूपस्य 5 l. add. शोभेति निपातनात् शुभिर्भिदादेराकृतिगणत्वात् अङ्-सिद्ध एव गुणप्रतिषेधाभावस्तु निपात्यते ॥३४॥

सर्ग ८ 20

अवैमि हंसावलयो बलाकास्त्वत्कान्तिकीर्तेश्चपलाः पुलाकाः ।
उड्डीय युक्तं पतिताः स्रवन्तीवेशान्तपूरं परितः प्लवन्ते ॥३५॥

अवैमीत्यादि[1] । अहमवैमि जाने । हंसानामावलयस्तथा बलाकाश्च तव कान्तेः कमनीयतायाः कीर्तेः ख्यातेश्चपलाः सूक्ष्माः पुलाकाः तुषकणाः । पुलाकं भक्तसिक्थेऽपि ( ) इति भट्टहलायुधस्मरणात् । ततो युक्तम् उड्डीय स्रवन्तीनां[2] [वेशान्तानां च] पूरं परितः [पतिताः प्लवन्ते] तरन्ति[3] । कर्मणि द्वितीये (पा० II.iii.2) त्यत्र [सूत्रे] उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥ (वा० 136) इत्यत्र अन्यत्रापि इति, अभितः परितः समया निकषा हा प्रतियोगेऽपि च (वा० 137) दृश्यते इति वचनात् परितःशब्दयोगे पूरमिति द्वितीया । केचित्तु[4] व्याचक्षते – उड्डीय विश्वमध्ये पतिताः सन्तः [परितः] प्लवन्ते[5] तरन्ति । किं कृत्वा ? स्रवन्तीर्नदीर्वेशान्तान् तडागानि[6] च पूरयित्वा । स्रवन्तीवेशान्तानां प्रमाणं प्लवनेन पूरयन्तीत्यर्थः । तदा[7] प्लवनस्य वर्षत्वमुपचर्य, वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्[8] (पा० III.iv.32) इति णमुल्प्रत्ययः[9] । तव[10] च रमणीयता[11] प्रसिद्धेरवयवा धवलपक्षिणः ये तुषकणाः उड्डीय जलमध्ये पतितास्तरन्ति । [अवैमीति अस्य हंसावलय इत्यादिवाक्यस्यार्थः[12] कर्म । अतोऽत्र प्रथमा । यथा – पश्यैते पशुबन्धवेदिवलयैरौदुम्बरीदन्तुरैर्नित्यव्यञ्जितगृह्यतन्त्रविधयो रम्या गृहस्थाश्रमाः ( ? ) इति । हंसावलय इत्याद्युड्डीयेत्यादिना एकमेव वाक्यम् ।] ॥३५॥

1 P1 अवै ; P2 om. अवैमीत्यादि । 2 P2 श्रवन्तीनां 3 P1 add. विशन्ति मज्जन्ति अस्मिन् वेशान्तः अनुपत्वलं 4 P1 add. तु 5 P1 प्लवन्ति 6 B तडागानि 7 P1 om. तदा 8 B तुलोपश्च ; P1 कुलोपश्च ; P2 उलोपश्च 9 B णम् 10 P1 add. तथा वा 11 P1 रमणीयतायाः 12 P2 ०वाक्यार्थः ———— ॥३५॥

सर्ग ८ 21

भवत्पदाङ्गुष्ठमपि श्रिता श्रीर्ध्रुवं न लब्धा कुसुमायुधेन।
रतीशजेतुः खलु चिह्नमस्मिन्नर्धेन्दुरास्ते नखकैतवेन ॥३६॥ /न्न

भवत्पदेत्यादि। ध्रुवं कुसुमायुधेन भवतः पदाङ्गुष्ठमपि श्रिता श्रीः शोभा न लब्धा। अतः खलु अस्मिन्नङ्गुष्ठे रतीशस्य कामस्य जेतुः श्रीमहादेवस्य चिह्नं लक्षणम् अर्धेन्दुः अर्द्धचन्द्रः नखस्य कैतवेन आस्ते। यत्र तत्र अर्द्धचन्द्रः स स कामस्य जेता। यथा श्रीमहादेवः। तथाऽङ्गुष्ठोऽपि कामस्य जेता। नखलक्षणार्द्धचन्द्राङ्कितत्वादित्यनुमानं प्रमाणम्। अर्द्धचन्द्रो गलहस्तता च ॥३६॥

राजा द्विजानामनुमासभिन्नः पूर्णां तनूकृत्य तनूं तपोभिः।
कुहूषु दृश्येतरतामिषेण सायुज्यमाप्नोति भवन्मुखस्य ॥३७॥

राजेत्यादि। द्विजानां राजा [चन्द्रः] कुहूषु अमावास्यासु दृश्येतरताया अदृश्यत्वस्य मिषेण भवन्मुखस्य सायुज्यम् आप्नोति। तव मुखे लीनो भवतीत्यर्थः। किं कृत्वा? पूर्णां तनूं तपोभिस्तनूकृत्य। किं भूतः? अनुमासं मासं मासम् अनु लक्षीकृत्य भिन्नः पृथक् अन्यः। अग्रेतनश्चन्द्रस्तपसा कृशीभूय तव मुखे सायुज्यलक्षणा(११व) मुक्तिं प्राप्नोति। तदनु द्वितीयमासे पुनरप्यन्यश्चन्द्रो मुक्तिं प्राप्नोति। एवं भिन्नो भिन्नो भवति सायुज्यं चाप्नोति। अन्योऽपि विप्रराज एवं परमेश्वरो लयं गच्छति ॥३७॥

1 I भवत्प; ह भवत्पदाङ्गुष्ठेति। 2 B पाद° 3 I, ह रतीशं कामं — ॥३६॥
1 ह +x+ सायोज्य° 2 I राजा; ह राजा द्विजानामिति। 3 B राजः 4 ह प्राप्नोति 5 I, ह om. इत्यर्थः 6 I, ह om. मासं ..... कृत्य 7 I om. तदनु ..... प्राप्नोति 8 ह om. भिन्नो 9 I वाप्नोति; ह प्राप्नोति ——— ॥३७॥

सर्ग ८ 22

विधाय चित्रे तव वीर[1]! नेत्रे किं कृष्णसारस्य दृशोर्मृगस्य।
अदूरजाग्रद्द्विरदप्रणालीच्छलाद्ददावर्धविधिरर्धचन्द्रम्॥३८॥

विधाय[2] चित्रे इत्यादि। हे वीर[3]! [विधिः] तव चित्रे रुचिरे नेत्रे विधाय कृष्णसारस्य [मृगस्य] दृशोः किम् अर्धचन्द्रं गल-हस्तताम् अयच्छत् ददौ। कस्मात्? अदूरे दृशोः समीपे जाग्रती विधे-माना [या] द्विरदरेखा द्वयगर्ताकारा प्रणाली तस्याः छलात्। पशूनां चक्षुष[4] उपरि गर्तरूपा द्विपद्विका रेखा भवन्ति॥३८॥

मुग्धः स मोहात् सुभगान्न देहाद्दृढं वदन्भूरचनाय चापम्[प]।
भ्रूभङ्गजेयस्तव यन्मनोभूरनेन रूपेण यदा तदाऽभूत्॥३९॥

मुग्धः[1] स मोहादित्यादि। स कामो भवतो भ्रुवो रच-नाय विधेश्चापं[प][2] ददर्पयन् सन् मोहान्मुग्ध इति प्रसिद्धिमेति[3] स्म, न तु[4] सुभगात् देहात्[5] हेतोर्मुग्धो मनोज्ञः सुन्दरोऽपि किल मुग्ध उच्यते। यत् यस्मात्तवाऽनेन[6] रूपेण मनोभूः यदा तदा [यदा] कदाऽपि[7] भ्रूभङ्गेणैव जेयोऽभूत्[8] भ्रूक्षेपमात्रेण जीयते। अथ भ्रुवौ चापं कामस्य यदा भज्यते, तदा जीयत एव॥३९॥

मृगस्य नेत्रद्वितयं तवाऽऽस्ये विधौ विधुत्वानुमितस्य दृश्यम्।
तस्यैव चञ्चत्कचपाशवेषः पुच्छे[1] स्फुरच्चामरगुच्छ एषः॥४०॥

1 P2 text धीर 2 P1 विधा।; P2 विधाय चित्रे इति 3 P1 add. धीर 4 B चक्षुषि 38

1 P1 मुग्धः।; P2 मुग्धः स मोहादिति। 2 P1, P2 ददन्°; 3 P1 अर्पयन् 3 P1 om. मोहात् / र्थ 4 P1 om. तु; P2 तत 5 P2 om. देहात 6 P1, P2 अनेन तव 7 P2 om. यदा कदा 8 B भुज्यते —— ॥३९॥ 1 P2 text पुच्छः ——

मृगस्य[2] नेत्रेत्यादि। हे पुरुष! तवाऽऽस्ये विधौ मृगस्य नेत्रद्वितयं दृश्यम्। किंभूतस्य? विधुत्वेनाऽनुमितस्य। यत्र यत्र चन्द्रस्तत्र तत्र मृग इत्यनुमानम्। [च] [3] तस्यैव मृगस्य पुच्छे[4] स्फुरन् चामररूपो गुच्छो[5] गुच्छः। किंभूतः? चञ्चन्[6] दीप्रः कच-पाशो धम्मिल्ल एव वेषो यस्य स[7] तथा॥ ७०॥

आस्तामनङ्गीकरणाद्भवेन दृश्यः स्मरो नेति पुराणवाणी।
तवैव देहे श्रितया श्रियेति नवस्तु वस्तु प्रतिभाति वादः॥ ७१॥

आस्तामनङ्गीत्यादि[1]। इति पुराणवाणी पुराणस्य[2] वाणी अथ च जीर्णवाक् आस्तां दूरे तिष्ठतु। भवेन[3] श्रीमहादेवेनाऽ-नङ्गीकरणात्[4] अङ्गरहितीकृतत्वात् स्मरो न दृश्यः। तु पुनः अयम् इति[5] नवो नूतनो वादः वस्तुभूतः रम्यः प्रतिभाति। इतीति किम्? तवैव देहे श्रितया[6] [श्रिया] शोभया अनङ्गीकरणात्[7] अस्वीकृतत्वात्। लज्जया स्मरो न दृश्यते। सा वाणीमात्रं जीर्णा च[8]। अयं तु नवः तथा वादः विमृश्य। पक्षप्रतिपक्षपरिग्रहो वादः। [तद्दुक्तम् - यत्र वीतरागो वीतरागेणैव सह तत्त्वनिर्णयाय[9] स्वसाधनोपालम्भौ करोति। सा वीत-रागकथा वादसंज्ञैवोच्यते इति[10]। अक्षपादसूत्रमपि प्रमाणम्। तर्क-साधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरि-ग्रहो वादः (न्या०सू० १।२।१) इति। तं प्रतिपक्षहीनमपि वा कुर्यात् प्रयोजना-

१ P[1] मृगस्य]; P[2] मृगस्य नेत्रेति। 3 P[1] om. एव तस्य 4 P[2] पदवः एव:
5 B गुम्फः 6 P[1] चञ्चल; P[2] चञ्चत् 7 P[2] om. स ——॥ ७०॥
1 P[1] आस्ताम्]; P[2] आस्तामनङ्गीति। 2 P[2] om. पुराणस्य वाणी 3 B भवने
4 P[1] ०करणत्वात् 5 P[1] om. इति 6 P[2] आश्रितया 7 P[1] ०करणत्वात् 8 P[1] वा 9 P[1] निर्णयार्थः साधनो० 10 P[1] om. इति ——

[पि]तृत्वेन यथा शिष्यो गुरुणा सह प्रस्थसारेणैवेत्यर्थ इति]॥४१॥

त्वया जगत्युञ्छितकान्तिसारे यदिन्दुनाऽशीलि शिलोञ्छवृत्तिः।
आरोपि तन्माणवकोऽपि मौलौ स यज्वराज्येऽपि महेश्वरेण ॥४२॥

[1]त्वयेत्यादि। यत् त्वया उञ्छितः [2]गृहीतः कान्तेः [3]सारो यस्य तत्र तथाविधे जगति सति इन्दुना शिलोञ्छवृत्तिः अशीलि कृता। पतितमञ्जरीग्रहणं शिलं, कणग्रहणम् उञ्छः। कान्तेः[4] कणोच्चयनं [कृतम्]। यत् तत् [स] महेश्वरेण माणवकोऽपि वटुमात्रोऽपि [5]मौलौ आरोपि। तथा यज्वनां राज्येऽपि आरोपि। [6]यः किल माणवको हारः स कथं मस्तके आरोप्यते। महता ईश्वरेण च यसकर्तृणा — मधिपतिश्चन्द्रः तेन तपसा कृतः] द्विजराजत्वात् ॥४२॥

आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्यकथादरिद्रम्।
त्वदङ्गशिल्पात् पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ॥४३॥

[1]आदेहेत्यादि। अहं जाने। ईश्वरेण तवाङ्गशिल्पात् चिरेण पुनरपि जगत् अन्वकम्पि। किं कृत्वा? कुसुमायुधस्याऽऽदेहदाहं [2]दाहात्प्रभृति सौन्दर्यकथाया दरिद्रं जगद्विधायेदानीं त्वां सृष्ट्वा[3] दया कृता। सौन्दर्यसारत्वात् ॥४३॥

॥ P. om. इति ॥४१॥ 1 P. त्वया; P2 त्वया जगतीति। 2 B उञ्छितं गृहीतं 3 B सारं तस्य 4 P. add. मञ्जरी° 5 P. add. समस्तं व्यस्तं विपर्यस्तं चैतत्। वृत्तिषु ऋतमुच्यते। तथा च मनुः — ऋतमुञ्छशिलं ज्ञेयम् (IV. 5) इत्यादि। omit om. यत 6 P2 मस्तके कथं — ॥४२॥ 2b आदेहेत्यादि। P. आदेहदाहम्; P2 आदेहदाहमिति। 2 P. add. देह° 3 P2 दृष्ट्वा — ॥४३॥

सर्ग ८ 25

मही कृतार्था यदि मानवोऽसि जितं दिवा यद्यमरेषु कोऽपि।
कुलं त्वयाऽलङ्कृतमौरगं चेन्नाऽधोऽपि कस्योपरि नागलोकः ॥४४॥

[1]महीकृतार्थेति। हे सुभग! यदि [2]त्वं मानवोऽसि, तदा मही कृतार्था। यदि त्वममरेषु [मध्ये] कोऽपि, तदा दिवा स्वर्गेण जितम्। चेत् त्वया उरगाणां सम्बन्धि कुलमलङ्कृतं तर्हि नागानां लोको अधोभागे [3]वर्त्तमानोऽपि कस्य लोकस्योपरि वर्ती न भ(॥१८)वति। अपि तु भुवादीनामुपरि। अधोऽपि सर्वोपरि पाठान्तरम् [अत्र नवीकृतत्वम्]॥[4]४४॥

सेयं न धत्तेऽनुपपत्तिमुच्चैर्मच्चित्तवृत्तिस्त्वयि चिन्त्यमाने।
ममौ स भद्रं चुलुके समुद्रस्त्वयात्तगाम्भीर्यमहत्त्वमुद्रः ॥४५॥

[1]सेयं नेत्यादि। सेयं मम चित्तवृत्तिः त्वयि चिन्त्यमाने ईदृशीमनुपपत्तिम् अघटमानतां [मुच्चै]रति[2]शायिनीयमपि न धत्ते। यतस्त्वया आत्ता गृहीता गाम्भीर्यस्य[3] महत्त्वस्य च मुद्रा सर्वस्वं यस्य स[4] तथाविधः सन् समुद्रो यत् अगस्त्यस्य चुलुके[5] ममौ, तद् भद्रं[6] युक्तम्। अर्थः मह मुद्रया वर्त्तते तस्य मुद्राग्रहणे महत्त्वं गाम्भीर्यमपि गच्छति। ततः स चुलुके[?] अपि अपकासदृशो भवति। हस्ते माति[7] स इति किं वाच्यम्!! ततः का अघटमानता, घटते एवेदम्॥४५॥ /स्त

1 P. मही का।; P2 मही कृतार्थेति। 2 P. मानवोऽसि ~~त्वं~~ त्वम्; P2 त्वं यदि 3 P. भ्वादीं M B. MS. ——॥४४॥
1 P. सेयम्। P2 सेयं न धत्ते इति। 2 B ०रतिशयनी०; P ०रतिशायिनी० 3 P. add. च M P2 om. यस्य ... महत्त्वं 5 P. चलुके; P2 चुलके 6 B स० 7 P. नाति —— ॥४५॥

सर्ग ८ 26

संसारसिन्धावनुबिम्बमत्र जागर्ति जाने तव वैरसेनिः ।
बिम्बानुबिम्बौ हि विहाय धातुर्न जातु दृष्टातिसुरूपसृष्टिः ॥७६॥

संसार[1]सिन्धा[2]वित्यादि । अहं जाने । अत्र संसारसिन्धौ वैरसेनिर्नलः तवाऽनुबिम्बं प्रतिबिम्ब[3]युक्तं जागर्ति । हि यस्मात् बिम्बानुबिम्बौ विहाय जातु कदाचित् धातुर्ब्रह्मणः अतिसुरूपाणां[4] सृष्टिर्न दृष्टा । बिम्बस्य सदृशं प्रतिबिम्बमेव दृश्यते, नान्यत् ॥७६॥

इयत्कृतं केन महीमहेन्द्रमहो महीयः सुकृतं जनेन ।
पादौ यमुद्दिश्य तवाऽपि पथ्यारजःसु पद्मस्रजमारभेते ॥७७॥ /ते (margin)

इयत्कृतमित्यादि[1] । हे महीमहेन्द्रवत् [नलवत्] महस्तेजो यस्य स तथा तस्य सम्बोधनम् । हे नलसदृश! इयत् महीयः सुकृतं केन जनेन कृतम् । भूमौ यमुद्दिश्य तवाऽपि पादौ पथ्यायाः[2] [पथ्या मार्गस्य] रजःसु पद्मस्रजम् आरभेते[3] । भवता क्व गम्यत इत्यर्थः । पदपङ्क्तिः [4]कमलानां मालासदृशी । मही[5] जगत्यामहो इति पाठे, महीविषये अहो इति व्याख्येयम् । जगतीशब्दो जगद्वाचकः ॥७७॥

ब्रवीति मे किं किमियं न जाने सन्देहदोलामवलम्ब्य संवित् ।
कस्याऽसि धन्यस्य गृहातिथिस्त्वमलीकसम्भावनयाऽथवाऽलम् ॥७८॥

1 P. संसार; 2 B °सन्धौ°; P2 °सन्धावित्ति । 3 P2 om. प्रतिबिम्ब° 4 P2 °सरूपा° —— ॥७६॥

1 P. इयत्कृतम् ; P2 इयत्कृतमिति । 2 P. पथ्याया 3 B P. आरभते
4 B किल; 4 P2 कमल° 5 P2 मही इति पाठे —— ॥७७॥

[1]ब्रवीतीत्यादि। इयं मे मम सेवित अस्मा[2]च्चित्तवृत्तिः सन्देहदोलाम् अवलम्ब्य। ते [इति पाठे ते] तव त्वत्सम्बन्धि किं [3]किं ब्रवीति किमपि सम्भावयति इत्यहं न जाने। त्वं कस्य धन्यस्य गृहातिथिरसि। कथं ममैव धन्याया अतिथिरिति व्यङ्ग्यम्। [4]अथवा अनया अलीकया व्यर्थया[5] अनुपपद्यमानया सम्भावनया चिन्तया अलं पूर्यताम् ॥४८॥

प्राप्तैव तावत्तव रूपसृष्टिं निपीय दृष्टिर्जनुषः फलं मे।
अपि श्रुती नामृतमाद्रियेतां तयोः प्रसादीकुरुषे गिरं चेत् ॥४९॥

[1]प्राप्तैवेत्यादि। तावत् मे मम दृष्टिः तव रूपसृष्टिं निपीय, जनुषो जन्मनः फलं प्राप्तैव। ततः श्रुती [2]अपि अमृतं नाद्रियेताम्। कथं मां [3]पिबेताम्?। तयोर्यदि त्वं स्वकीयां गिरं प्रसादीकुरुषे। आलापं करोषि ॥[4]४९॥

इत्थं मधूत्थं रसमुद्गिरन्ती तदोष्ठबन्धूकधनुर्विसृष्टा।
कर्णात् प्रसूनाशुगपञ्चबाणी वाणीमिषेणाऽस्य मनो विवेश ॥५०॥

[1]इत्थमित्यादि। तस्याः दमयन्त्या ओष्ठ एव बन्धूककुसुमधनुः तस्मात् विसृष्टा मुक्ता वाण्या मिषेण प्रसूनाशुगस्य

1 B अब्रवी°; P, ब्रवीति; P2 ब्रवीति मे इति। 2 P, om. अस्मत् 3 P, कं 4 P, add. कस्याऽभीति पाठान्तरम् 5 B व्यर्थम् 6 P, चिन्तनया —॥४८॥
1 P, प्राप्तैव; P2 प्राप्तैव तावदिति। 2 P2 om. अपि 3 P, मा पिबातां ?; P2 मा पिबतां म B 89. —॥४९॥
1 P, इत्थं मधूत्थम्; P2 इत्थं मधूत्थमिति। —

पञ्चबाणी[2] शरसमाहारः[3] कर्णात् श्रवणं प्राप्य[4] अस्य नलस्य मनो विवेश। किं कुर्वती? मधुनः सकाशात् उत्थम्[उत्थितं]रसम् उद्गिरन्ती। मधुतुल्यस्वादात् कुसुमादपि मकरन्द उद्भवति। कथम्? उत्थम्। तथा शरोऽपि कर्णान्तं गत्वा त्वदुत्थं विध्यति। आत्माऽपि विजय-चतुष्टयसंयोगात् क्वाऽपि[5] त्रयसंयोगात् क्वाऽपि द्वयसंयोगात् गृह्णाति। प्रथममात्मा मनसा संयुज्यते[6]। ततो मनश्चक्षुषा, ततश्चक्षू रूपेणेति[7] चतुष्टयम्॥ तथात्मा मनसा, मनः श्रोत्रेण[8], तत्र च शब्दः समवेतः। ततोऽत्र वाणीश्रवणे त्रयसंयोगः। यतः श्रोत्रं नाम कर्ण-शष्कुल्यवच्छिन्नो नभोभागः[9]। तत्रैव च[10] समवेतः शब्दोऽस्ति[11]। पृथक् योगो नास्ति। क्वापि (२०a) आत्मा मनसा संयुज्यते[12], तत[13] आत्मनि समवेतत्वात् सुखादिज्ञानम्, अत्र द्वयसंयोगः॥५०॥

---

आमज्जदाकण्ठमसौ[1] सुधासु प्रियं प्रियाया वदनान्निपीय।
द्विषन्मुखेऽपि स्वदते स्तुतिर्या तन्मृष्टता मेष्टमुखे त्वमेया॥५१॥

---

आमज्जदित्यादि[2]। असौ नलः प्रियाया वदनात् प्रियं[3] वचनं निपीय [आमज्जत्[4]] [आकण्ठमिति पाठे] आकण्ठं सुधासु अमृतेषु आमज्जत्[5]। या स्तुतिर्द्विषतोऽपि मुखे वर्तमाना स्वदते, तस्याः स्तुतेर्मृष्टता स्वादुता इष्टस्य प्रियालङ्कारस्य मुखे वर्तमाना या अमेया निरतिशया किं मास्तु मा भवतु। अपि तु युक्तम्॥५१॥

---

2 P1 add: पञ्चमहा० 3 B शरः; P2 शराः 4 B प्रविश्य 5 P1 क्वाचित 6 P1 P2 युज्यते 7 P1 om. इति 8 P1 add. इति 9 B नभप्रदेशः 10 P2 om. च 11 P1 शब्दः समवेतोऽस्ति 12 P1 मनसंयुतः; P2 युतः 13 B तत्रात्मानं —॥५०॥
1 P2 text आमज्जद् 2 P1 आमज्ज; P2 आमज्जमामज्जदिति। 3 P1 om. प्रियं 4 P2 आमज्जम् 5 B आमज्जत — ॥५१॥

पौरस्त्यशैलं जनतोपनीतां गृह्णन् यथाऽहर्पतिरर्घ्यपूजाम् ।
तथातिथेयीमथ स प्रतीच्छन् प्रियार्पितामासनमाससाद ॥५२॥

पौरस्त्येत्यादि । यथा अह्नां पतिः श्रीसूर्यः जनताभि-रुपनीताम् अर्घ्यलक्षणां पूजां गृह्णन् सन् पौरस्त्यशैलमुदयाद्रिम् आसीदति । अथ स नलस्तथा तेन प्रकारेण प्रियया अर्पिताम् आतिथेयीं प्रतीच्छन् सन् आसनम् आससाद । पथ्यतिथिवसतिस्वपते-र्ढञ् (पा० IV.iv.104), आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (पा० VII.i.2) इति ढस्य एयादेशः ॥५२॥

अयोधि तद्धैर्यमनोभवाभ्यां तामेव भैमीमवलम्ब्य भूमीम् ।
आह स्म यत्र स्मरचापमन्तश्छिन्नं भ्रुवौ तज्जयभङ्गवार्ताम् ॥५३॥

अयोधीत्यादि । [तस्य] नलस्य धैर्येण तथा मनो-भवेन चोभाभ्यां तामेव भैमीं भूमीमवलम्ब्याऽयोधि । यत्र यस्यां भूमौ भ्रुवावेव स्मरचापम् अन्तर्मध्ये छिन्नं सत्तयोर्जयस्य भङ्गस्य च वार्तामाह स्म । दमयन्त्यां कृतधर्ममाश्रित्य नलस्य धैर्येण जितम् । कामस्य धनुर्भङ्गेन पराजयो जातः इति वदति स्म । भ्रूलक्षणं धनुः ॥५३॥

अथ स्मरान्नामवधीर्य धैर्याद्बूते स तद्वागुपवीणितोऽपि ।
विवेकधारारातधौतमन्तः सतां न कामः कलुषीकरोति ॥५४॥

1 P. पौरस्त्य ; P2 पौरस्त्येति । 2 P. जनतोप० 3 P. सर्व० 4 B आसादयति
5 B प्रियाया० 6 B संप्रती० 7 P. आयनेयीनिय: ढकजपां 8 B घस्येयादेशः ॥५२॥
1 P2 +ख भूमीमवलम्ब्य भैमीम् । 2 P. अयो ; P2 अयोधीति । 3 P2 यस्यां यत्र 4 B भ्रुवौ च 5 B तत 6 P2 तयोर्जयस्य 7 P. नलस्याऽधैर्येण 8 P. om. स्म 9 P. add. भूमीभैमीशब्दस्य व्यत्ययेन पाठान्तरम् ॥५३॥ 1 P2 +ख धैर्य० ——

अथ स्मरास्तामित्यादि। अथ स नलस्तस्या वाचा उपप्रीणितोऽपि उपस्तुतोऽपि स्मरस्याऽऽस्तां धैर्यात् अवधार्य ऊचे। यतः सतां महात्मनां विवेकधारा जलप्रवाहास्तासां शतेन धौतं सत् अन्तर्हृदयं कामो न कलुषीकरोति ॥५४॥

हरित्पतीनां सदसः प्रतीहि त्वदर्थमेवातिथिमागतं माम्।
वहन्तमन्तर्बहुनाऽऽदरेण प्राणानिव स्वःप्रभुवाचिकानि ॥५५॥

हरित्पतीनामित्यादि। त्वं हरित्पतीनां दिक्पालानां मां सदसः सभायाः सकाशात् त्वदर्थमेवागतम् अतिथिं प्रतीहि विद्धि। किं कुर्वन्तम्? अन्तर्मध्ये स्वःप्रभोरिन्द्रस्य वाचिकानि सन्देशान् प्राणानिव बहुना आदरेण वहन्तम्। स्वप्रभुवाचिकानीति पाठे स्वकीये प्रभुवाचिकानीति व्याख्या ॥५५॥

विरम्यतां भूतवती सपर्या निविश्यतामासनमुज्झितं किम्।
इत्यं हि यन्नः फलितं विधेयं सैवातिथेयी पृथुरुद्भवित्री ॥५६॥

विरम्यतामित्यादि। हे दमयन्ति। त्वया विरम्यताम्। सपर्या भूतवती पूजा जाता। आसनं निविश्यताम्। त्वया किमुज्झितम्? [इदानीं] हि यस्मात् यन्नोऽस्माकं कृत्यं फलितं साफल्यं विधेयम्। सैवातिथेयी पृथुः उद्भवित्री। पथ्यतिथी (पा° IV.iv.104) त्यादिना ढञ्। [या

2 I. अथ स्म। I₂ अथ स्मरासामिति। 3 B वच 4 B प्रवाहस्तस्यां 5 I, I₂ कलुषं —॥५४॥ 1 I₂ omit °हुना° 2 I, हरि। I₂ हरित्पतीनामिति। 3 I, I₂ मां omit 4 B सदशः 5 I, add. त्वदीयमेवा° 6 B I₂ विद्धि प्रतीहि 7 I, I₂ add. स्वःप्रभुणा 8 I₂ add. बहुत्वादरेण 9 I, add. स्व—॥५५॥ 1 I, विरम्य। I₂ विरमतामिति। 2 B सपर्यया 3 I निविश्यतामासनम् 4 B इत्थम् अस्माकं —॥५

सर्ग ८ 31

द्रुतता नः फलिता विधेयेति पाठान्तरम्॥५६॥

कल्याणि![1] कल्यानि नवाङ्कानि कच्चित्तमां चित्तमनाविलं ते।
अलं विलम्बेन गिरं मदीयामाकर्णयाकर्णलसायताक्षि!॥५७॥

कल्याणीत्यादि[2]। हे कल्याणि! नवाङ्कानि कल्यानि[3] नीरोगाणि वर्तन्ते। कच्चित्[4] प्रश्ने। तरप्तमपौ घ (पा० I. i. २२) इति तमप्[5] प्रत्ययस्य घसंज्ञायां, किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे[6] (पा० V. iv. ११) इति आम्। अतस्तमाम् अतिशयेन ते[7] तव चित्तम् अनाविलं वर्तते। तथा विलम्बेनाऽलम्। हे आकर्णलसम् आयते अक्षिणी यस्याः[8] तस्याः सम्बोधनम्। त्वं मदीयां गिरमाकर्णय॥५७॥

कौमारमारभ्य गणा गुणानां हरन्ति ते भैमि! दिशामधीशान्।
सुराधिराजं सलिलाधिपं च हुताशनं चार्यमनन्दनं च॥५८॥

कौमा(२०b)रमित्यादि[1]। हे भैमि! [ते] तव गुणानां गणाः कौमारमारभ्य दिशामधीशान् हरन्ति सुराणामधिराजमिन्द्रं[2] हरन्ति। तथा सलिलाधिपं वरुणं हुताशनं चार्यम्णो[3] नन्दनं यमं च॥५८॥

चरञ्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि विंशतेऽधि।
तेषां कुचश्रीरतरेण चित्तं पञ्चेषुणा कुण्ठितधैर्यवित्तम्॥५९॥

1. bh कल्यानि कल्याणि 2. कल्याणि; P2 कल्याणि कल्यानीति।
3. P2 कल्याणि MB, P2 क्वचित् 5. तरप्० 6. P2 ०दात्वद्रव्यकर्षे 7. om. ते
8. P2 वक्ष. सा —— ॥५७॥

1. कौमार; P2 कौमारमारभ्येति। 2. om. च 3. चक्ष. अरुणस्य —— ॥५८॥

सर्ग ८ 32

[1]चरञ्चरमित्यादि । [2]अर्थ हे दमयन्ति ! तेषां दिक्पालानां चित्तं त्वयि विषये [3][चिरं] चरत् सत् खिद्यते । किंविशिष्टायां [4]त्वयि ? शैशवस्य यौवनस्य [च] सम्बन्धि यद् [5]द्वैराज्यं वयःसन्धिः तद्भाजि [भजन्त्याम्] । किंभूतम् ? तेषामेव [6]कुचः कान्त्याश्चौरवरेण [त]पञ्चेषुणा कामेन [7]लुण्ठितम् अपहृतं धैर्यमेव वित्तं यस्य तत्तथा । कमनीयता अग्रे चोरिता । अधुना धैर्यं चोरितम् । यदा भूम्यां [8]राज[9]द्वयं भवति, तदा [10]यस्य चोरस्य पश्चादपि बाणा भवन्ति, सोऽपि दिक्पालानां वित्तं हरति । खिद्यते च लोकः । यथा इदानीं महा[11]मात्येन श्रीमाधवदेवेन श्रीउदय[राजे] राजनि [12]राज्यं कर्तुमारब्धे सति महाराजश्रीकर्णदेवस्य भूमौ गूर्जरधरित्र्यां सर्वत्र सर्वैजनानां वित्ते अपह्रियमाणे द्वैराज्यात् लोकविरक्तिरजनि ॥ ५९ ॥

---

तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम् ।
आशास्तु नासाद्य तनूरुदाराः पूर्वादयः पूर्ववदात्मदाराः ॥ ६० ॥

---

[1]तेषामित्यादि । इदानीं तेषां [2]दिक्पालानां हृदि केवलं [4]तव आशा किल अजस्रं विलसति । सा मनोरथरूपा । तु पुनः पूर्वादय आशा दिशः पूर्ववदात्मनो दारा [भार्या] न विलसन्ति न रोचन्ते । किं कृत्वा ? उदारा मनोज्ञास्तनूः शरीराणि आसाद्य । यतः शरीराणि आसां [दिशां] विरमणीयानि सन्ति ॥ ६० ॥

---

(श्लो)

1 P. चरञ्चरम् ; P2 चरच्चरमिति । 1. Om. अर्थ P2 चिरं 3 P. सत् M. P. om. त्वयि 5 B भूतानाम् 6. B P2 om. विमर्श: 7 B P. वद्ध लुञ्चितं 8 B भैम्यां 9 B द्वैराज्ये 10 B तस्य 11 B P2 महामात्यश्री 12 P. om. राज्यं — ॥ ५९ ॥

1 P. तेषाम् ; P2 तेषामिदानीमिति । 2 P2 दिक्पतीनां 3 P. केवल्ला 4 B किल आशा तव 5 P. वद्ध. आशास्तु नाथ्याद्येति पाठान्तरम् ॥ ६० ॥

सर्ग ८ 33

अनेन सार्धं नव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत् ।
प्रेमाऽपि तन्वि ! त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ॥६१॥

[1]अनेनेति । हे तन्वि ! तवाऽनेन यौवनेन सार्धं त्वयि विषये वासवस्य प्रेमाऽपि[2] परां कोटिं [3][परमप्रकर्ष]मध्यरोहत् ।[4]तथा सुमनःशरस्य कामस्य चापे गुणोऽपि[4] मौर्वी[5] परां कोटिं[6] द्वितीयामटनिम् अग्रभागमध्यरोहत् । किंभूतः ? । अच्छिदुरः अभुरनशीलः । स्नेहोऽपि तथा-विधः[7] । यथा यथा यौवनं परमप्रकर्षं प्राप्नोति, तथा तथा कामेन देवाः पीड्यन्ते । त्वय्यनुरक्त[8]त्वात्[9] ॥ ६१ ॥

प्राचीं प्रयातो[1] विरहाद्द्वयं ते तापाच्च रूपाच्च शशाङ्कशङ्की ।
परापराधैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ॥६२॥

[2]प्राचीमिति । अयमिन्द्रस्तव विरहात् प्राचीं प्रयातः सन् । भानुविशेषणत्वेन [वा मूलपाठः उदयप्राप्ते इत्यर्थः] । भानौ[4] विषये रुषा आरुणं [अ] लोचनानां वृन्दं सहस्रं श्रीसूर्यं[5] निदधाति । कैः ? परस्य चन्द्रस्य अपराधैः । किंभूतः ? । तापाच्च[6] तथा रूपाच्च[7] । मण्डलाकारमयात् पाठान्तरे । अरुणत्वाच्च शशाङ्कं शङ्कते इत्येवंशीलः । त्वद्विरहात् चन्द्रेण तप्यते । [8]त्वच्छङ्कया रविमपि कोपितः पश्यति ॥ ६२ ॥

1 P1 अने ; P2 अनेन सार्धमिति । 2 B प्रेमणा० 3 B द्वितीयामटनिम् अग्रभागम् new ; 4 P1 om. परां ... तथा 4 P1 add. धनुषि 5 P1 om. मौर्वी 6 P1 कोटिं परमप्रकर्षमध्यरोहत् । 7 B विधेयः 8 B ०सक्तत्वात् 9 P1 add. प्रेमशब्दः पुंसि नपुंसके च ॥ ६१ ॥

1 P2 text प्रयाते 2 P1 प्राचीम् ; P2 प्राचीं प्रयाते इति । 3 P1 उदयं 4 P1 add. श्रीसूर्यं 5 P1 om. श्रीसूर्यं 6 P2 चापाच्च 7 P1 P2 om. च 8 B P1 तत् ——— ॥६२॥

सर्ग ८ 34

त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता स कामः खलु कामवस्थाम् ॥६३॥

त्रिनेत्रेति[1] । श्रीमहादेवेन त्रिनेत्रमात्रेणैव[2] [सता] रुषा यत्कृतम् अद्यापि यस्तदेव न संवृणोति । न अनङ्गत्वं प्रतिकरोति । अहमिति न वेद न जाने । अद्य सहस्रनेत्रे रुष्टे[3] सति स खलु कामः[4] कामवस्थां [गन्ता] गमिष्यति ॥ अनङ्गत्वादप्यधिकतामिन्द्र(१२१०)-स्य सहस्रनेत्र[5]तया ॥६३॥

पिकस्य वाङ्मात्रकृताद्व्यलीकान्न स प्रभुर्नन्दति नन्दनेऽपि ।
बालस्य चूडाशशिनोऽपराधान्नाराधनं शीलति शूलिनोऽपि ॥६४॥

पिकस्येत्यादि[1] । इदानीं विभावानुभावव्यभिचारिणो धर्मान् आह । अत्र वर्णनीयो विप्रलम्भशृङ्गारो हि तैर्जायते । स प्रभुरिन्द्रः पिकस्य कोकिलस्य वाङ्मात्रेण कृतात् व्यलीकात् ध्वनि[2]कृतादपराधात् नन्दने वनेऽपि आनन्ददायिन्यपि न नन्दति[3] इति दैन्यम् । तथा बालस्य चूडाशशिनोऽपराधात् शूलिनोऽपि आराधनं[4] न शीलति नाचरति । इत्यालस्यं चन्द्रभयात् । यस्य हस्ते शूलं तमाराधयतो कुतो भयम्? वाङ्मात्रदोषात् पुत्रेऽपि न नन्दति । बालापराधात् शूलिनमपि नाराधयतीति विरोधः ॥६४॥

तमोमयीकृत्य दिशः परागैः स्मरेषवः शक्रदृशो विशन्ति ।
कुहूरुत[1]श्चञ्चुपुटं द्विजस्य राकारजन्यामपि सत्यवाचम् ॥६५॥

1 P त्रिनेत्र; P2 त्रिनेत्रमात्रेति । 2 P2 om. एव 3 P2 om. सति 4 P2 om. कामः 5 B °नेत्रत्वात् ॥६३॥ ‖ 1 P पिकस्य; P2 पिकस्य वाङ्मात्रेति । 2 B ध्वनि° 3 P2 °राधनेन न B °राधयेत् — ॥६४॥ ‖ 1 P2 text चगिर°

तमोमयीति[2]। स्मरस्य इभवः शक्रस्य दृशां कुहूरुतौ[3] द्विजस्य कुहूशब्दकारिणः पक्षिणः कोकिलस्य चञ्चुपुटं मुखं राकास्वप्यासामपि पूर्णिमारात्रावपि सत्यवाचं[4] दिशन्ति। किं कृत्वा? दिशः सर्वा अपि परागैः इषुपुष्परेणुभिस्तमोमयीकृत्य[5]। इन्द्रस्य नव विरहात् मोहलक्षण[6]व्यभिचारिभावात् पूर्णिमायामपि अमावास्यायामिव सर्वत्रा[7]न्धकारे जाते कुहूशब्दवचनमर्थतोऽपि सत्यं जातम् ॥६५॥

शरैः प्रसूनैस्तुदतः स्मरस्य स्मर्तुं स किं नाऽशनिना करोति।
अभेद्यमस्याऽहह वर्म न स्याद्‌नङ्गता चेद्गिरिशप्रसादः ॥६६॥

शरैरिति[1]। स[2] इन्द्रः[3] प्रसूनैः शरैस्तुदतः स्मरस्य स्मर्तुम् अशनिना वज्रेण किं न करोति किं न शक्नोति[4]? शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् (पा० III.iv.65) इति सूत्रेण शक्नोत्यर्थस्य कृञः प्रयोगे क्त्वा स्थाने तुमुन्प्रत्ययः। अपि तु सर्वं शक्नोति। चेत् यदि अस्य स्मरस्याऽनङ्गतालक्षणः गिरिशस्य प्रसादो न स्यात्। किंविशिष्टः प्रसादः? अभेद्यं वर्म सन्नाहः। [यतः] अङ्गरहितस्तस्य[5] वज्रेण क्व प्रहारः[6] क्रियते? अहह इति आश्चर्ये। स्मरणार्थकर्मणः स्मरस्य षष्ठी। दैन्यं भावः ॥६६॥

धृताधृतेस्तस्य भवद्वियोगादन्यान्यशाख्यारचनाय लूनैः।
अप्यन्यदारिप्रहराः प्रवालैर्जाता दरिद्रास्तरवः सुराणाम् ॥६७॥

2 P1 तमो।; P2 तमोमयीकृत्येति। 3 P1 add. कुहूगिरः 4 P1 add. सत्या वाक् यस्य तं 5 B °मयीं कृत्वा 6 P2 °लक्षणस्य 7 P1 सर्वान्ध°— ॥६५॥
1 P1 शरैः प्र।; P2 शरैः प्रसूनैरिति। 2 P1 om. स 3 B इन्द्रस्य 4 P1 शक्नोति न 5 B °सहितस्तस्य 6 P1 प्रहारः क०; P2 add. क्रियते क्व— ॥६६॥

सर्ग ८ 36

[1]धृताधृतेरित्यादि। सुराणामपि तरवः कल्पवृक्षाः प्रवालैः पल्लवैः दारिद्र्य रहित[ा]जाताः। किंभूताः? अन्येषां दारिद्र्यहरा अपि। किंभूतैः? तस्येन्द्रस्य अन्यस्या [अन्यस्याः][3] शय्याया रचनाय लूनैः नित्यच्छिन्नैः[4]। किंभूतस्य? भवत्या वियोगात् धृता[4] अधृतिरधैर्यं येन तस्य तथा। परितापाधैर्ययोर्व्यभिचारिणोः सङ्करः॥६७॥

स्वैर्गुणास्फालभवैः स्मरस्य स्वर्णाथकर्णौ बधिरावभूताम्।
गुरोः शृणोतु स्मरमोहनिद्राप्रबोधदक्षाणि किमक्षराणि॥६८॥

[1]स्वैरित्यादि। स्मरस्य गुणास्फालभवैः स्वैर्धनुष्टङ्कारैः स्वर्णाथस्येन्द्रस्य कर्णौ बधिरौ अभूताम्। ततः स गुरोर्बृहस्पतेः स्मरमोह एव निद्रा तस्याः प्रबोधार्थमपनयनार्थं दक्षाणि[3] समर्थानि अक्षराणि वाक्यानि किं शृणोतु, न कथञ्चित्। आढ्यं नाम भावः॥६८॥

अनङ्गतापप्रशमाय तस्य कदर्थ्यमाना मुहुरामृणालम्।
मधौ मधौ नाकनदीनलिन्यो वरं वहन्तां शिशिरेऽनुरागम्॥६९॥

[1]अनङ्गतापेति। नाकनद्या आकाशगङ्गाया नलिन्यो वरं शिशिरे[2] अनुरागं वहन्तां [वहन्ते]। तासां शिशिरो हिमक्लेशक्लेशोऽपि वरम्, न पुनर्वसन्तः कमलपोषकोऽपि यतः। किंभूताः? तस्येन्द्रस्याऽनङ्गतापप्रशमाय[3] मुहुरामृणालं कदर्थ्यमानाः। एव?[4] मधौ मधौ वसन्ते वसन्ते। कामज्वरो भावः॥६९॥

1 धृता० 2 धृताधृतेरिति। 2 दारिद्र० 3 अन्यस्याः 4 छिन्नौ; नित्यं 5 एकता 6 अभिचारिणो —॥६७॥ 1 स्वैर्गुणास्फलजैः, 2 स्वैर्गुणास्फालैरिति। 2 नभौ 3 दक्षाणि 4 अं० ३्यं —॥६८॥ 1 अनङ्गा, 2 वहन्ताम्; वहताम् 3 प्रशमनाय 4 एव एवं 5 ज्वरोद्भाप॥६९

दमस्वसः! सेयमुपैति तृष्णा जिष्णोर्जगत्यग्रिमलेख्यलक्ष्मीम्।
दृशां यदक्ष्णोस्तव नाम दृष्टेस्त्रिभागलोभार्तिमसौ बिभर्ति॥७०॥

---

दमस्वसरिति[1]। हे दमस्वसः! सेयं जिष्णोरिन्द्रस्य तृष्णा जगति अग्रिमलेख्यलक्ष्मीमुपैति प्रथमा गण्यते। नाम अहो [यत्] असाविन्द्रः स्वयं दृशाम् अक्ष्णः समुद्रोऽपि सहस्रदृक्त्वात्[2] तव[3] दृष्टेः तृतीयभागस्य लोभार्तिं बिभर्ति। अथ च करालोभं कुरुते[4]॥७०॥

---

अग्न्याहिताः शश्वदुपासते यां देदीप्यमानां तनुमष्टमूर्तेः।
आशापतिस्ते दमयन्ति! सोऽपि स्मरेण दासीभवितुं न्यदेशि॥७१॥

---

अग्न्याहिता[1] इति। याम् अष्टमूर्तेः श्रीमहादेवस्य[2] तनुं हुताश-[नलक्ष]णां मूर्तिं शश्वत् अग्न्याहिताः आहिताग्नयोऽग्निहोत्रेण उपासते आराधयन्ति[3]। निष्ठा (पा० II.ii.36) इति पूर्वनिपाते प्राप्ते, वाहिताग्न्यादिषु (पा० II.ii.37) इति विकल्पवचनात्[4] परत्वम्। हे दमयन्ति! सोऽपि आशापतिः आग्नेयकोणदिक्पालः स्मरेण ते तव दासीभवितुं न्यदेशि [आदिष्टः]। किंभूताम्? देदीप्यमानां हविर्भिर्दीप्ताम्[5]॥७१॥

---

त्वद्गोचरस्तं खलु पञ्चबाणः करोति सन्ताप्य तथा विनीतम्।
स्वयं यथाऽऽस्वादिततप्तभूयः परं न सन्तापयिता स भूयः॥७२॥

---

1 P. दमस्यसः। 2 B. सहस्रदृगपि 3 P. om. तव; P2 भव म P.
अनुप्रासः। सम्पूर्णस्याऽपि अत्यल्पे प्रयत्नपरत्वात् विषमत्वं च। यथा विपुलेन सागरशयस्य (कु० ४.१५) इति हीनेन गुरुकार्यकरणात्॥७०॥

1 P. अग्न्या 2 B. महेश्वरस्य 3 BP2 आराधयन्ति v.l. ०परत्वम्
4 P. वचनकल्पात् 5 P2 ०दीप्तिं; P. add. पदार्थे वाक्यवचनम् ओजः॥७१॥

सर्ग ८ 38

त्वद्गोचर इति। हे दमयन्ति! त्वद्गोचरः त्वद्विषयः पञ्चबाणः कामः खलु त्वं वह्निं सन्ताप्य तथा विनीतं करोति, यथा भूयः परमन्यं स वैश्वानरः [न] सन्तापयिता सन्तापयिष्यति। किं विशिष्टः? स्वयमास्वादितं तप्तभूयं तप्तभवनं येन [स] तथा। स्वयं कामतापमनुभूय पुनरस्याऽग्नितापं न करिष्यति। आसादित° इति पाठे, आसादितं तप्तभवनं येनेत्यर्थः ॥७२॥

---

अदाहि यस्तेन दशार्धबाणः पुरा पुरारेर्नयनाल्लयेन।
स निर्दहंस्त्वं भवदङ्गवासी न वैरशुद्धेरधुनाधमर्णः ॥७३॥

---

अदाहीति। पुरा पूर्वं यो दशार्धबाणः कामः तेन वह्निना पुरा[रे:] [श्री]महादेवस्य नयनाल्लयेन तृतीयनेत्रस्थितेन सता अदाहि। स कामस्त्वं वह्निं भवत्या अङ्गवासी चक्षुषि कटाक्ष[द्वा]रेण निर्दहन् सन् अधुना [न] अधमर्णः [न] ऋणधारी। कस्याः? वैरशुद्धेः सकाशात्। वैरं शोधयित्वाऽऽत्मनः अधमर्णत्वं ~~[struck]~~ स्फोटितवान् ॥७३॥

---

सोमाय कुप्यन्निव विप्रयुक्तः स सोममाचामति हूयमानम्।
नामाऽपि जागर्ति हि यत्र शम्भोस्तेजस्विनस्तं कतमे सहन्ते ॥७४॥

---

सोमायेति। सोऽग्निः सोमवल्लीलक्षणं हवि-र्यज्ञेषु अध्वर्युभिर्हूयमानम् आचामति भक्षयति। उत्प्रेक्षते –

---

1. त्वद्गो। 2 P. add. स 3 Om. 2 om. सन्तापयिता; edi. add. सन्तापयिता 4 P. om. स तथा 5 P2 add. इत्यर्थः 6 P2 add. अनुभूयं(तं) – ॥७२॥ 1 P. अदाहि; P2 अदाहिय इति। 2 B नव 3 P2 om. सन् – ॥७३॥ 1 P. सोमा; P2 सोमाय कुप्यन्निवेति। 2 P. P2 आचमति

सोमाय चन्द्रमसे कुप्यन्निव । [3]यतो विप्रयुक्तः विरही । अथ च विप्रयुक्तः । [4]हि यस्मात् यत्र शत्रोर्नामाऽपि जागर्ति तेजस्विनः पुरुषाः तं [5]कतमे सहन्ते । अपि तु न मृष्यन्ति । [कतमे इति पाठान्तरम्] ॥८४॥

शरैरजस्रं कुसुमायुधस्य कदर्थ्यमानस्तरुणि ! त्वदर्थे ।
अभ्यर्थ्यमानैर्विनिवेध्यमानाद्प्येष देवः कुसुमाद्बिभेति ॥८५॥

[1]शरैरिति । हे तरुणि । एष देवोऽग्निः त्वदर्थे कुसुमायुधस्य शरैरजस्रं कदर्थ्यमानः सन् कुसुमादपि बिभेति । किंभूतात् ? । [2]अभ्यर्थ्यमानैः पूजापरैः पुरुषैर्विनिवेध्यमानादपि । [तु कुसुमायुधस्येति साभिप्रायम्] ॥८५॥

स्मरेन्धने वक्षसि तेन दत्ता संवर्त्तिका शैवलवल्लिचित्रा ।
चकास्ति चेतोभवपावकस्य धूमाविला कीलपरम्परेव ॥८६॥

[1]स्मरेन्धने इति । तेन वह्निना स्मरस्येन्धनभूते [2]स्ववक्षसि दत्ता संवर्त्तिका कमलिनीनवदलानि चकास्ति शोभते । किंभूता ? । शैवलवल्लिभिश्चित्रा । उत्प्रेक्षते — चेतोभवपावकस्य कामाग्नेः कीलानां [3]ज्वालानां परम्परा इव । किंभूता ? धूमेनाऽऽ[4]विला मिश्रा ॥८६॥

3 I₁ ततो M I₁ विप्रयुक्तो 5 B कतमे —— ॥८४॥
1 I₁ शैरैरजस्रम् I₂ शरैरजस्रमिति । 2 I₂ om. पूजापरैः —— ॥८५॥
1 I₁ स्मरेन्धने । 2 I₁ om. स्व° 3 B I₂ कीलानां M B °विल —— ॥८६॥

सर्ग ८ 40

पुत्री सुहृद्येन सरोरुहाणां यत्प्रेयसी चन्दनवासिता दिक्।
धैर्यं विभुः सोऽपि तवैव हेतोः स्मरप्रतापज्वलने जुहाव ॥७७॥

पुत्री[1] सुहृदिति। हे भैमि! येन कृत्वा सरोरुहाणां सुहृत् [श्री]सूर्यः [पुत्री][2] पुत्रवान् प्रशस्यपुत्रम्। इन्नगैकस्वराक्रवात् ( ? ) इतीन्। तथा यस्य प्रेयसी चन्दनवासिता दिक्। दक्षिणस्यां मलयपर्वते चन्दनाः। सोऽपि वि(226b)भुः यमः तवैव[3] हेतोः स्वधैर्यं[4] स्मर[6]-प्रतापज्वलने[5] जुहाव। कमलानि चन्दनाश्च शीतलास्तथापि यमस्य विरहो न शमितः॥७७॥

तं दह्यमानैरपि मन्मथैधं हस्तैरुपास्ते मलयः प्रवालैः।
कृच्छ्रेऽप्यसौ नोज्झति तस्य सेवां सदा यदाशामवलम्बते यः॥७८॥

तं[1] दह्यमानैरि[2]ति। मलयाचलस्तं यमं दह्यमानैरपि प्रवालैरेव हस्तैरुपास्ते आराधयति। किंभूतम्? मन्मथस्य एधा[3]ग्निरिन्धनभूतम्। यस्मात् यः पुरुषः सदा यस्याऽऽशाम् अवलम्बते असौ सः कृच्छ्रेऽप्यागते सति तस्य सेवां नोज्झति। तस्य च स्वस्य च कृच्छ्रमङ्गीकृत्य सेवते। आशा आकाङ्क्षा मलयोऽपि[4] यमस्याऽऽशां दक्षिणां दिशमाश्रयति॥७८॥

स्मरस्य कीर्त्येव सितीकृतानि तद्दोःप्रतापैरिव तापितानि।
अङ्गानि धत्ते स भवद्वियोगात् पाण्डूनि चण्डज्वरजर्जराणि॥७९॥

1 P. पुत्री। ज्ञ्हे 2 R omits पुत्री 3 B तथैव M B स्मरत्प्र० 5 B ०ज्वालने
6 P. स्मरस्य ——॥७७॥
1 P. तं दह्य। 2 B ०मानेति। 3 R एधेन्धन० M. मलयः स्वयमप्याशां——॥७८॥

स्मरस्य[1] कीर्त्येति। स यमः भर्तृवियोगात्[2] अङ्गानि पाण्डूनि धत्ते। तथा, चण्डेन[3] कामज्वरेण [जर्जराणि]। [उत्प्रेक्ष्यते]— स्मरस्य कीर्त्या इव[4] सितीकृतानि [तथा] तस्य कामस्य दोष्णोर्भुजयोः प्रतापैः तापितानीव[5] ॥७९॥

---

यस्तन्वि! भर्त्रा घुसृणेन सायं दिशः समालम्भनकौतुकिन्याः।
तुभ्यं तदा स प्रणिधाय चित्तं गतो यदाऽऽयाति पुनर्न पान्थः ॥८०॥

---

यस्तन्वीति[1]। हे तन्वि! यः सायं सन्ध्यायां घुसृणेन कुङ्कुमेन समालम्भनमुद्वर्तनं तत्र कौतुकिन्याः दिशः पश्चिमायाः भर्त्ता वरुणो वर्त्तते। स तदा तुभ्यं त्वदर्थे तस्मिन् मुहूर्ते चित्तं प्रणिधाय यदा काले गतः पान्थः[2] पुनर्गृहं नाऽऽयाति[3]। वरुणस्य मनस्त्वयि स्थितमेव ॥८०॥

---

तथा न तापाय पयोनिधीनामस्वामुखोत्थः क्षुधितः शिखावान्।
निजः पतिः सम्प्रति वारिपोऽपि यथा हृदिस्थः स्मरदाहदुःस्थः ॥८१॥

---

तथा[1] नेति। अस्वामुखं[2] पातालं तस्मादुत्थ[3] उत्थितः [उत्थानं यस्येति। वा स्थास्नापिबतिव्याधिहनिम्यः कः ( )] शिखावान् वडवानलः हृदिस्थः क्षुधितः पयोनिधीनां तथा न तापाय बभूव। [4]यथा सम्प्रति त्वद्विरहे निजः पतिर्वरुणः वारि पातीति वारिपः

---

1 I₁ स्मरस्या; I₂ स्मरस्य कीर्त्यैवेति। 2 I₂ त्वत॰ 3 I₂ चन्द्रेण 4 B कीर्त्य इव 5 I₂ तापिनीव ॥७९॥ // 1 I₁ यस्तन्वि; I₂ यस्तन्वि भर्त्तेति। 2 I₂ om. पान्थः 3 B मनोऽपि स्थितमेव; I₂ — स्थितमेव ॥८०॥ // 1 B तथा नेति; I₁ तथा; I₂ तथा न तापायेति। 2 B I₂ अस्व॰ 3 I₁ उत्थितं 4 I₁ पर्वव: अस्वामुख; मैं अुषित: पाठान्तरम्। —

वारिपतिरपि हृदिस्थः चित्ते तापाय वर्त्तते। यतः स्मरदाहेन दुःस्थः तप्तः। अथ च यं वारि पिबति। वाडवः क्षुधितः। [यद्यपि वडवाशब्द एव प्रयोक्तुमर्हः तथापि, तुरङ्गकान्ताननहव्यवाहे ( ! ) इत्यादि-प्रयोगदर्शनात् अत्रापदेन परिवृत्तिः कृता] ॥८१॥

---

यत्प्रत्युत त्वन्मृदुबाहुवल्लिस्मृतिस्रजं गुम्फति दुर्विनीता।
ततो विधत्तेऽधिकमेव तापं तेनाऽऽश्रिता शैत्यगुणान्मृणाली ॥८२॥

---

यत्प्रत्युतेति। यत् प्रत्युत इस्मात् तव मृद्वी या बाहुवल्लिः तस्या स्मृतिस्रजं स्मरणैरन्तर्यं गुम्फति। यतो दुर्विनीता। तेन म्य वरुणेन शैत्यगुणात् [आश्रिता] मृणाली ततः कारणात् तापम् अधिकमेव विधत्ते। ततो विरहतापं कुरुते इत्यर्थः ॥८२॥

---

न्यस्तं ततस्तेन मृणालदण्डखण्डं बभासे हृदि तापभाजि।
तच्चित्तमग्नैर्मदनस्य बाणैः कृतं शतच्छिद्रमिव क्षणेन ॥८३॥

---

न्यस्तं तत इति। तेन वरुणेन ततो विरहात् हृदि न्यस्तं मृणालदण्डस्य खण्डं बभासे। यतस्तापभाजि तप्ते। उत्प्रेक्षते तस्य चित्ते मग्नैर्मदनस्य बाणैः क्षणेन शतच्छिद्रमिव कृतम्। तत्र चि स्वभावादेव बहूनि छिद्राणि भवन्ति ॥८३॥

---

5 P। वाड्यं 6 P2 ०मुख० 7 P2 ०ना० कृता —॥८१॥

1 P2 ~~स्त्र~~ श्रिता 2 P। यत्प्रत्युत। 3 B तव तु 4 B ०वल्ली 5 P2 अधिकमेव तापं धत्ते —॥८२॥

1 P। न्यस्तम्।; 2 P। add. पूर्वश्लोकोक्तशैत्यगुणादथवा आर्द्रभावत्वेन प्रकाशात् ततो 3 P2 च भासते 4 B मग्नो 5 B मतः 6 P विच्छिन्नो ॥८३॥

इति त्रिलोकीतिलकेषु तेषु मनोभुवो विक्रमकामचार:।
अमोघमस्त्रं भवतीमवाप्य मदान्धतानर्गलचापलस्य ॥ ८४॥

---

इति[1] त्रिलोकीति। इति अमुना प्रकारेण तेषु त्रिलोकीतिलकेषु देवेषु विषये[2] मनोभुव: कामस्य भवतीम् अमोघम्[4] अस्त्रम् अवाप्य[5] विक्रमस्य [कामचारो] यथेष्टचेष्टा वर्त्तते[6]। किंभूतस्य? मदान्धतया अनर्गलं चापलं यस्य[7] तस्य तथा ॥ ८४॥

---

सारोऽथ धारेव सुधारसस्य स्वयंवर: श्वो भविता तवेति।
सन्तर्पयन्ती दमयन्ति! तेषां श्रुति: श्रुती नाकजुषामयासीत् ॥ ८५॥

---

सारोऽथ[1] धारेवेति। हे दमयन्ति! अथाऽनन्तरं तेषां नाकजुषां देवानां श्रुती कर्णौ इति श्रुति: वार्त्ता अयासीत्[2]। किं कुर्वन्ती? सन्तर्पयन्ती। उत्प्रेक्षते—सुधारसस्य अमृतस्य सार उत्कृष्ट[3] धारेव। सारशब्द उत्कर्षे पुंल्लिङ्ग:। न्याय्यादिनपेते[4] नपुंसकम् (लि॰ ३ न्या॰ ...) यथा नैतत्सारम्। धारा इव अमृतप्रवाह इव। इतीति किम्?[5] श्व:[6] आ(२२b) गामिनि दिने तव स्वयंवरो [भविता][7] भविष्यतीति[8] श्रुत्वा ऐन्द्रादय: आनन्दिता: सन्ति ॥ ८५॥

---

समं सपत्नीभवदु:खतीक्ष्णै: स्वदारजासापथिकैर्मरुद्भि:।
अनङ्गशौर्यानलतापदु:स्थैरथ प्रतस्थे हरितां मरुद्भि: ॥ ८६॥

---

1 P. इति त्रि। 2 P2 विषयेषु 3 P2 भवन्ती 4 P2 add. सफलं 5 B अधाप्य 6 B add. कामबाण; P2 कामचारो विक्रमस्य 7 P2 स तस्य — ॥ ८४॥
1 P. सारो। 2 P2 आयासीत् 3 B उत्कृष्ट 4 P. add. न 5 P. इवेति किम्। 6 P. श्वि 7 B P P2 om. भविता; ed. add. भविता 8 P2 om. इति — ॥ ८५॥

समं[1] सपत्नीति। अथ हरितां मुखैरिन्द्रादिभिर्दिशां दैवैश्चनङ्गारौर्थम् एवाऽनलस्तस्य तापेन दुःस्थैः सद्भिः प्रतस्थे स्वयंवरे चलितम्। कैः समम्?। स्वकीयानां दाराणां [हरितां]मिन्द्राणीप्रभृतीनां [2]नासाया नासिकायाः पथिकैर्मरुद्भिर्निःश्वास[3]वायुभिः समम्। किंभूतैः[4]?। सपत्न्याः सकाशात् भयं[5] दुःखं तेन तीक्ष्णैः[6] तप्तैः। अस्माकं सपत्नी भविष्यतीति दुःखात् तासां निःश्वासाश्चलिताः[7]। कार्यकारणभावेन सहोक्तिः॥८६॥

---

अपास्तपाथेयसुधोपयोगैस्त्वच्चुम्बिनैव स्वमनोरथेन।
क्षुधं च निर्वापयता तृषां च स्वादीयसाऽध्वा गमितः सुखं तैः॥८७॥

---

अपास्तेति[1]। तैर्देवैः सुखं सुखेनैव [अध्वा] मार्गो गमितः[2] नीतः[3]। [केन?। त्वां चुम्बतीत्येवंशीलेन स्वेन मनोरथेनैव।] किंभूतेन?। [अमृतादपि स्वादीयसा][4] क्षुधं च तृषां पिपासां च[5] निर्वापयता[6] स्फेटयता। अत एवाऽपास्तः त्यक्तः पाथेयार्थं पथिगतशम्बलार्थं सुधाया अमृतस्य उपयोगो [यैः] तैस्तथा[7]। सिद्धमन्नं मार्गे न गृहीतम्[8]॥८७॥

---

त्वच्चुम्बिनैव स्वमनोरथेन स्वादीयसाऽस्तक्षमितक्षुधेन।
अपार्थ[1]पाथेयसुधोपयोगैरध्वा भुवस्तैरयमत्यवाहि॥८८॥

---

1 P. समम्। 2 P. add. च 3 P. श्वास० 4 P2 किंभूतैः। 5 P. भयं; P2 भयं यत 6 P. P2 निःश्वासश्चलित:। 7 P. add. हरितां तापदुःस्थमरुतां हरितां दुःखतीक्ष्णैर्मरुद्भिः समं प्रस्थानं प्रयुक्तमेव। —॥८६॥ // 1 P. अपा; P2 अपास्तपाथेयेति। 2 B नमितः 3 P. यातः 4 P. add. दमयन्तीं प्राप्स्याम इति बुद्ध्या। किंभूतेन?। 5 P. P2 om. च 6 B निर्वपयता 7 P. om. तैः 8 P2 मार्गेण P. add. तद्विषयमनोरथेन सुधाकार्यकरणादतिशयोक्तिः॥८७॥
1 P2 text अपास्त०

त्वच्चुम्बिनैवेत्यादि । तमेवोक्तमर्थम् अधिकविवक्षया पुनराह । तैर्देवैरियं भुवः पृथिव्या अध्वा अत्यवाहि अतिक्रान्तः । किंभूतैः ।। त्वच्चुम्बिनैव तव प्राप्तिमनोरथेन स्वेन स्वादुतरेणा-पार्थो निरर्थकः पाथेयः क्षुधोपयोगो येषां तैः तथा । किंभूतेन ।। अस्तङ्गमिता क्षुत् बुभुक्षा येन तेन तथा ।।८८।।

देवीं मनोभूशरदावदाहे दिवं तवार्थादिव मज्जयद्भिः ।
सुराधिनाथैः क्रियतेऽधुना तैः पादार्पणानुग्रहभूरियं भूः ।।८९।।

देवीमिति । हे भैमि ! अथानन्तरम् अधुना तैः सुराधिनाथैरियं भूः पृथ्वी पादार्पणस्य अनुग्रहभूमिः क्रियते । देवानां चरणा भूमौ न लगन्ति । परं सोऽपि तैः तस्याः प्रसादः कृत इति । किं कुर्वद्भिः ।। तवार्थात् तव कारणात् देवीं देवीभावं गमिताम् । देवी-मिति क्वचित्पाठे विषयत्वेन देवानां सम्बन्धिनीं दिवं स्वर्गम् । मनो-भुवः शरो एव दावदाहो दवाग्निस्तत्र मज्जयद्भिः क्रोडयद्भिः ।।८९।।

अलङ्कृतासङ्गमहीविभागैरयं जनस्तैरमरैर्भवत्याम् ।
अवापितो जङ्गमलेखलक्ष्मीं निक्षिप्य सन्देशमयाक्षराणि ।।९०।।

2 P. त्वच्चुम्बि । 3 P. add. तैरित्यस्य विशेषणेनाऽतिव्यवहितत्वं माभूदि-ति 4 B. किंभूतेन ।। 5 B. कीदृशेन ।। 6 B. add. क्षुधा 7 P. add. अति-शयोक्तिः ।।८८।।

1 B. text स्वर्लोकनाथैः 2 P. देवीम् ।; B. देवीं मनोभूशरेति । 3 B. अथाऽनन्तरं at the end 4 P. add. स्वर्लोकनाथैः 5 B. लगन्ति न 6 P. B. तैः सोऽपि 7 P. B. कारणेन 8 P. add. अनुप्रासोऽतिशयोक्तिः । इव मज्जयद्भिरिति पाठे उत्प्रेक्षाऽपि ।।८९।।

[1]अलङ्कृतेति। अद्य मल्लङ्घणो जनः अहं तैरमरैः भवत्यां त्वयि विषये अङ्कमस्य[2] चलतो लेखस्य लक्ष्मीं शोभाम् अवापितः। अन्यत् लिखितं स्थावरम् अचेतनं भवति। अहं [3]चेतनवान् लेखः। किं कृत्वा?। सन्देशमयानि अक्षराणि निक्षिप्य। किं[4]भूतैः?। अलङ्कृत आसन्नो निकरो महीविभागो यैस्तैस्तथा। अत्रैव नगरभूमौ स्थित्वा। [सन्देशनमक्षराणि इति पाठान्तरम्[5]]॥९०॥

प्रत्येकमेते परिरभ्य पीनस्तनोपपीडं त्वयि सन्दिशन्ति।
त्वं नः प्रसूनाशुगभल्लशल्यजुषां विशल्यौषधिवल्लिरेधि॥९१॥

[1]प्रत्येकमिति। हे तन्वि! [2]एते देवाः त्वयि प्रत्येकं सन्दिशन्ति। किं कृत्वा?। पीनस्तनयोः त्वाम् उपपीड्य अथवा पीनाभ्यां [3]स्तनाभ्यां उपपीड्य। आत्मानं तत्स्वान्तेन परिरभ्य आलिङ्ग्य[illegible]। उपपीडरुधकर्षश्च (का० IV vi ...) इति णमुल्[4]। सप्तम्यां चोपपीडरुधकर्ष (पा० III iv 49) इति पाणिनीयम्। त्वं नोऽस्माकं विशल्या शल्याभावकरणी[5] ओषधिवल्लिः एधि भव। किं[6]भूतानाम्?। प्रसूनाशुगस्य कामस्य भल्लानि बाणा एव शल्यानि तज्जुषां तद्विदानाम्। [त्वं मूर्च्छतां नः स्मरभल्लशल्यैर्मुदे इति पाठान्तरम्[7]]॥९२॥

त्वत्कान्तिमस्माभिरियं पिपासन्मनोरथाश्वासनयैकयैव।
निजः कटाक्षैः खलु विप्रलभ्यः कियन्ति यावद्गुण वासराणि॥९३॥

1 P. अलङ्कृ; P2 अलङ्कृतासन्नेति। 2 B चलन्तो; P2 om. चलतो.... सन्देश० 3 P. add. तु M B कीदृशैः? 5 P. add. अनुप्रासो रूपकं च ॥९०॥
1 P. प्रत्येकम्; P2 प्रत्येकमेते इति। 2 P P2 एते देवाः हे तन्वि! 3 P2 om. स्तनाभ्यां M B णमुल् 5 B ०कारिणी 6 B कीदृशानाम्? 7 P. add. अनुप्रासो रूपकं च। P2 add. शल्यजुषामिति च ॥९१॥

सर्ग ८ 47

[1]त्वत्कान्तिमित्यादि । त्वं भण वद । [खलु][2] अस्माभिरयं
निजः करोऽयं तव कान्तिं पिपासन्[3] किय(१२३व)न्ति वासराणि यावत्
विप्रलम्भ्यः प्रतारणीयः । कया ? । एकया निराधारया मनोरथस्यैवाऽऽश्वास-
नया । वासराणीति कालाध्वनोरत्यन्तसंयोगे (पा॰ II.iii.5) इति द्वितीया ।
फलप्राप्तेरभावात्, अपवर्गे तृतीया (पा॰ II.iii.6) इति न तृतीया । अत्र भण
इति वाच्येन औत्सुक्यद्योतनात् गर्भितत्वं गुणः । यथा -

तुम्मि अवहत्थि[4]अरेहो णिरंकुसो[5] अह विवेअरहिओ वि ।
सिविणे वि[6] तुमम्मि पुणो[7] पत्तिहि भत्तिं ण पसुमरामि[8] ॥ (का॰ प्र॰ VII.
३२०) इत्यत्र प्रतीहि भक्तिमिति दृढप्रत्ययोत्पादनार्थं गर्भितत्वं गुणः[9] ॥९२॥

अनुग्रहोऽस्मासु यदि त्वदीयस्तदेहि देहि द्रुतमङ्कपालीम् ।
चार्वङ्गि! निर्वापय तापमङ्गैरनङ्गलीलालहरीतुषारैः ॥९३॥

[1]अनुग्रह इति । यदि त्वदीयोऽस्मासु अनुग्रहो वर्तते,
तत् एहि आगच्छ । [द्रुतं शीघ्रम्] अङ्कपालीमालिङ्गनं देहि हे चार्वङ्गि!
अनङ्गस्य लीला विलासास्तासां लहरीभिः तुषारैः शीकरैरङ्गैस्तापम्/त-
मस्मदीयं निर्वापय शमय[2] ॥९३॥

दयस्व किं घातयसि त्वमस्माननङ्गचण्डालशरैरदृश्यैः ।
भिन्ना वरं तीक्ष्णकराग्रबाणैः प्रेमस्तव प्रेमरसात्पवित्रैः ॥९४॥

1 P. त्वत्कां ; R. त्वत्कान्तिमस्माभिरिति । 2 P. add. वाच्यालङ्कारे 3 B
पिपासात् ; P. पिपासुः सन् 4 B P. R. त्थरेहो 5 B P. R. णकुसो 6 B मन्तु
वंपि 7 B विणो ; P. इणो ; R. चिणो 8 B पुंसिमि ; P. पम्मुसिमि ; R.
पुष्पकुसुमि 9 P. add. समासोक्तिः ॥९२॥

1 P. अनुग्रह इत्यादि । 2 P. add. अनुप्रासः ॥९३॥

दयस्वेति [1] किमिति । त्वं दयस्व [2] दयां कुरु । किमस्मान् अनङ्गा एव चण्डालस्तस्य शरैर्हत्यै [3] घातयसि कथं मारयसि ॥ हे भीरु ! वयं तव प्रेमरसात् पवित्रैः कुसुमबाणैः भिन्नाः सन्तः यत [6] प्रेमः [7] प्रेता भवामः, तत् वरं [सुचिरम् ।] न तु चण्डालेन हताः । इण् (।।२०)गतौ, प्रपूर्वस्य कर्मभावोत्तम बहुवचने मस् । प्रियेति क्वचित्पाठोऽस्ति, [8] सहृदया । पुनरा कुर्यं [9] [पाठः उपपन्नः । प्रिये इति] पाठोऽनुपपन्न इति [10] ॥ ९४ ॥

---

त्वदर्थिनः सन्तु परस्सहस्राः प्राणास्तु नस्त्वच्चरणप्रसादः ।
विशङ्कसे कैतवनारितं चेदन्तश्चरः पञ्चशरः प्रमाणम् ॥ ९५ ॥

---

त्वदर्थिन [1] इति । हे तन्वि ! परे [2] सहस्राः पुरुषाः सहस्रेभ्योऽपि परे त्वदर्थिनः सन्तु [3] । परः [4] शतादिरि (सि० कौ० III.75) इति सुट् आगमः । तु पुनः नोऽस्माकं प्राणाः जीवितं तव चरणयोरेव प्रसादः । त्वदायत्ता एव चेत् [5] यदि इदमस्मद्वचनं कैतवनारितं छद्मनो विलसितं विशङ्कसे । तत [6] अन्तश्चरः अस्मदन्तर्वर्ती पञ्चशरः [7] प्रमाणं साक्षी । सोऽपि [8] शरायुधत्वात् भयाभावात् [9] साक्ष्यं न वदति । अन्तश्चरो देवः सर्वत्र साक्षी ॥ ना
॥ ९५ ॥

---

अस्माकमध्यासितमेतदन्तः प्रिये ! भवत्या हृदयं चिराय ।
बहिस्त्वयाऽलङ्क्रियतामिदानीमुरो मुरं विद्विषतः श्रियेव ॥ ९६ ॥

---

अस्माकमिति [1] । हे प्रिये [2] ! भवत्या त्वया । एतदस्माकम्

---

1 B दयस्य; P1 दय । 2 B दयस्व 3 P1 प्र हत्यै : M P1 om. कथं 5 P2 भीरु ! 6 P1 यतः 7 P1 add. क्रियापदं 8 B पाठे; P1 पाठोऽपि 9 P1 add. एव 10 P1 add. अनुप्रासो रूपकमतिशयोक्तिश्च ॥ ९४ ॥ 1 P1 त्वदर्थि । 2 P1 परं 3 P2 om. सन्तु 4 P2 om. परः 5 B P1 P2 यदि चेत्; Ed. चेत् यदि 6 P1 P2 इति तत 7 B पञ्चबाणः 8 P1 om. सोऽपि.... साक्षी ॥ 9 P2 add. कूटम् ॥ ९५ ॥ 1 P1 अस्माकम् । 2 B हे स्त्रि ! —

अन्तर्हृदयमध्ये चिराय अध्यासितम्। इदानीं बहिरपि आलिङ्गनेन उरो हृदयदेशोऽयं त्वयाऽलङ्क्रियताम्। यथा श्रियै मुरं विद्विषतः श्रीकृष्णस्य उरः अलङ्कृतम् ॥९६॥

दयोदयश्चेतसि चेत्तवाऽभूदलङ्कुरु द्यां विफलो विलम्बः।
इमामेव देवालयतां नयामो भूमौ रतिश्चेत्तव जन्मभूमौ ॥९७॥

दयोदय[1] इति। चेत् तव चेतसि दयायाः उदयः अभूत् तत् द्यां स्वर्गमलङ्कुरु। विलम्बो विफलः। चेत् यदि तव जन्मभूमित्वात् भूमौ [रतिः] वर्त्तते। ततो वयं इमां पृथ्वीमेव देवालयतां नयामः स्वर्गत्वं प्रा[पय]ामः। पृथिवीमेव श्रयामः[2] (स्वर्गभोगानत्रैव कुर्मः)[3] [भुवः स्वर्देशमथाऽऽचरामो भूमौ धृतिं यासि यदि स्वभूमौ इति पाठान्तरम्] ॥९७॥

स्वर्णौवितीर्णैः[1] करवाम वामनेत्रे भवत्याः किमुपासनासु।
अङ्ग! त्वदङ्गानि निपीतपीतदर्पाणि पाणिः स्वलु याचते नः ॥९८॥

स्वर्णौवितीर्णै[2][रि]ति। हे[3] वामे प्रधाने नेत्रे यस्याः

उरः श्रिताम्। विपतः — ॥९६॥
1) दयोदय। 2) आश्रयामः 3) ००. जन्मभूमिरित्यस्य गुह्यार्थत्वेन व्रीडादायकत्वादश्लीलत्वं नाशङ्कनीयम्। इह हि लक्षणया गुह्यार्थं न तु स्वशक्त्येति। तथा च वामनः - असभ्यार्थान्तरमसभ्यस्मृतिहेतुश्चाऽश्लीलम्। (यथा) वर्ज्य इति शेषः विप्रार्थम्। यथा कृकाटिका इत्यश्लीलं दोषमभिधाय, न गुह्य(ल)क्षितसंवृतानी (...) त्यपवादमाह स्म। तत्राऽप्रसिद्धासभ्यमुक्तम्। यथा सम्बाध इति सङ्करार्थं न गुह्यार्थं लाक्षणिकासभ्यं लक्षितं जन्मभूमिः लोकसंवीतं संवृतम्। सुभगा भगिनी - इत्यादि। अतो लाक्षणिकत्वाद्दोषाभावः ॥९७॥ 1) text only विनोति ... ९८, स्वर्णौ ... ९९.
2) स्वर्णैः। 3) om. हे

[तस्याः] सम्बोधनम् । वयम् उपासनासु पूजाकाले[4] भक्त्या वितीर्णै-र्दत्तैः सुवर्णपुष्पादिभिः[5] स्वर्णैः[6] किं करवाम । अपि तु न कार्यम् । अङ्ग । अहो नोऽस्माकं पाणिः खलु त्वदङ्घ्रीनि याचते । किंभूतानि ? । निर्जितो जितः[7] पीतवर्णस्य[8] सुवर्णादिवर्णस्य दर्पो यैस्तानि तथा ॥ ९८ ॥

धिनोति नास्माञ्जलजेन पूजा त्वय्यन्वहं तन्वि ! वितन्यमाना ।
तव प्रसादोपनते तु मौलौ पूजाऽस्तु नस्त्वत्पदपङ्कजाभ्याम् ॥ ९९ ॥

धिनोतीति[1] । हे तन्वि ! त्वयि[2] अन्वहं वितन्यमाना जल-जेन[3] पूजा अस्मान् न धिनोति न प्रीणयति[4] । तु पुनस्तव प्रसादाय उपनते[5] नम्रे[6] नोऽस्माकं मौलौ मस्तके तव पदपङ्कजाभ्यां पूजा अस्तु ॥ ९९ ॥

वयं कलादा इव दुर्विदग्धं त्वद्गौरिमस्पर्द्धि दहेम हेम ।
प्रसूननाराचशरासनेन सहैकवंशप्रभवभ्रु ! बभ्रु ॥ १०० ॥

वयमिति[1] । (८२३ b) हे प्रसूननाराचस्य [कामस्य] शरासनेन सह एकस्मिन् वंशे अन्वये प्रभवा[2] उत्पन्ना भ्रूर्यस्यास्तस्याः[3] सम्बोधनम् । कामधनुर्भ्राजिष्णुर्भ्रूरित्यर्थः ! । अथ च वंशो वेणुः । [सुभ्रु] ! इति वक्तव्ये अयं व्यासङ्गमत्कारकारी ॥ वयं हेम सुवर्णं दहेम । यस्तव गौरिमगुणस्य स्पर्द्धाकरम् । अत एव दुर्विदग्धम् अनभिज्ञम् । के इव ? । कलादा इव । यथा सुवर्णकारा दुर्विदग्धं[4] अदग्धकलां

4 B₂ °कालेषु 5 B सुवर्णादिपुष्पैः 6 B सुवर्णैः 7 B₂ यतः 8 B पीतवाणस्य सुवर्णादिवाणस्य — ॥ ९८ ॥ // 1 B₁ धिनोति ; B₂ धिनोति नास्मानिति । 2 B₁ om. त्वया 3 B₂ add. कमलेन 4 B₂ प्रीणाति 5 B उपमते 6 B न च ; B₂ om. नम्रे — ॥ ९९ ॥ // 1 B₁ वयम् ; B₂ वयं कलादा इवेति । 2 B प्रभाव 3 B भ्रू 4 B₁ दुर्विदग्धम् —

वर्णिकां दहानाः[5] आरोपयन्तः सन्तो दहन्ति। [कान्तां दत्ते आदत्ते वा कान्तात्[6]]। किंभूतम्? बभ्रु कपिलं पिङ्गलम्। त्वं तु गौराङ्गी ॥१००॥

सुधासरस्सु त्वदनङ्गतापः शान्तो न नः किं पुनरप्सरस्सु।
निर्वाति तु त्वन्ममताधरेण सूनाशुगेषोर्मधुशीकरेण ॥१०१॥

सुधासरस्सु[1] इति। हे तन्वि! नोऽस्माकं तव अनङ्गतापः सुधायाः अमृतस्य सरःसु कुण्डेषु न शान्तः। किं पुनर्वाच्यम्? यत् अपां सरस्सु न शान्तः। तु पुनः तव ममताधरेण स कामतापो निर्वाति। किंभूतेन? सूनाशुगस्य[2] कामस्य इषोर्बाणस्य मधुनः[3] शीकरेण ~~म~~ मकरन्दशीतलेन। मदीयोऽयम् [इति] चेत् अधरं त्वं वदसि, तदा[4] शाम्यति[5] ॥१०१॥

खण्डः खलु त्वद्गिर इव खण्डः किं शर्करा तत्पथशर्करैव।
कुरङ्गि! तद्भङ्गिरसोत्थकच्छतृणं न दिक्षु प्रथितं तदिक्षुः ॥१०२॥

खण्डः[1] खलु इति। खलु[2] खण्डः[:] खण्डशर्करा त्वद्गिरः तव वाण्येव[3] खण्डः शकलम्। तथा किं शर्करा तस्याः त्वद्वाचः पथि शर्करा वालुका इव। तत्पथ इति, ऋक्पूरब्धूःपथामानक्षे (पा० ५।४।७४) इति अच्[4]। नु इति वितर्के। [हे कुरङ्गि! इक्षुः तस्याः वाण्याः[5] भङ्गीनाम् उक्तिविशेषाणां यो रसः तस्मात् उत्थ उत्पन्नः [तस्मादुत्थ

5 B दहन 6 P. add. सुवर्णां मार्ष्टि आखण्डयति वा —॥१००॥

1 P. सुधासर। 2 B सुनाशुकस्य 3 B न पुनः 4 B तदैव 5 P. add. अनुप्रासो रूपकं विरोधोऽतिशयोक्तिः॥१०१॥ ~~4 B दहन इति, P. दहामित्यादि~~

1 P. खण्डः खलु 2 P2 om. खलु 3 P. वाच इव; P2 वाण्या इव 4 B अः 5 P2 त्वद्वाण्या —

उत्थानं यस्याः एवंविधो[6] यः कच्छस्तीरं तस्य तृणं भणित्वा दिक्षु प्रथितम्। तत् सरसामिक्षुरिति प्रसिद्धम्।[7] [रसोत्थमिति तृणविशेषणं च][8] एते मधुराः पदार्थाः तव वाचः एकदेशे प्रमुखसम्बन्धिमात्राः[9]॥१०२॥

ददाम किं ते सुधयाऽधरेण त्वदास्य एव स्वयमास्यते हि।
विधुं विजित्य स्वयमेव भावि भवन्मुखं तन्मखभागभोजि॥१०३॥

[1]ददामेति। हे भैमि! वयं ते तुभ्यं किं ददाम[2]। हि यत-स्तव आस्ये एव अधरेण ओष्ठरूपया सुधयाऽऽस्यते स्थीयते स्वयमपि। अथ च अधरीरूपया[3] जितया [सुधया] स्थीयते। अस्मदीयेऽमृतं परमकोटि। तत्तवादेशकारि। किं च भवत्या मुखं विधुं विजित्य स्वयमेव च[4] तस्य चन्द्रस्य यो [मखे यागे] भागः तस्य [भोजि][5] भोजनशीलं भावि भविष्यति। [यागभागदानं यत्] तदपि अस्मदीये[ऽस्ति] परं निरर्थकम्[6]॥
॥१०३॥

प्रिये! वृणुष्वाऽमरभावमस्मदिति त्रपाकृद्वचनं न किं नः।
त्वत्पादपद्मे शरणं प्रविश्य स्वयं वयं येन जिजीविषामः॥१०४॥

[1]प्रिये! वृणुष्वेति। हे प्रिये! त्वमस्मत्[2] सकाशात् अमरभावं वृणुष्व[3] इति वचनं नोऽस्मदीयं किं न त्रपाकरम्[4]? येन कारणेन[5] वयं स्वयं तव पादापेव पद्मे शरणं प्रविश्य जिजीविषामः[6]॥१०४॥

6 P2 add: वास्याऽस्ना पिबाति व्याधिहनिष्यः कः (दुर्ग IV.v.66)। 7 P1 om. इक्षु-रिति प्रसिद्धम्। 8 P1 add. 7 here, 9 P1 add. अनुप्रास उत्प्रेक्षा च॥१०२॥
1 B ददाम इति; P1 ददामेत्यादि। P2 ददाम किं ते सुधयाऽधरेणेति। 2 BP2 ददामः 3 P1P2 अधरभूतया 4 P1P2 om. च 5 BP1P2 om. भोजि; edn. add. भोजि 6 P1 add. अनुप्रासो रूपकमतिशयोक्तिः॥१०३॥ 1 P1 प्रिये वृणु। 2 B अस्मात् 3 P1 वृणु 4 P1 add. लज्जाकरम्। त्रपोद्दिष्ट वच इति पाठान्तरम्। 5 B प्रकारेण 6 B add. इति; P1 add. अनुप्रासः काव्यलिङ्गं रूपकमतिशयोक्तिश्च॥१०४॥

नाऽस्माकमस्मान्मदनापमृत्योस्त्राणाय पीयूषरसायनानि।
सुधारसादप्यधिकं प्रयच्छ प्रसीद वैदर्भि! निजाधरं नः ॥१०५॥

---

नाऽस्माकमस्मादिति[1]। अस्माकमस्मात् मदन एव अपमृत्युः तस्मात् पीयूषाण्यमृतानि[2] रसायनानि त्राणाय[3] न जायन्ते। [ता] सुधारसादप्यधिकं नोऽस्माकं निजमधरं[4] प्रयच्छ। हे वैदर्भि! प्रसीद प्रसादं कुरु। प्रसादस्यात्यन्तमपेक्षितत्वात्। प्रसीदेति वाक्येन गर्भितत्वं गुणः ॥१०५॥

---

प्लुष्टः स्वैश्चापरोपैः सह स हि मकरेणाऽऽत्मभूः केतुनाऽभू-
द्धन्वी नस्त्वत्प्रसादादथ मनसिजतां मानसो नन्दनः सन्।
भ्रूभ्यां ते तन्वि! धन्वी भवतु तव सितैर्जैत्रभल्लः स्मितैः स्ता-
दस्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाङ्कः ॥१०६॥

---

प्लुष्ट[1] इति। आत्मभूः कामः हि निश्चितं स स्वैः अग्रेतनैः चापैः रोपैर्बाणैः[2] सह तथा मकरेण केतुना च सह प्लुष्टो दग्धोऽभूत्। अथाऽधुना त्वत्प्रसादात् नोऽस्माकं मानसो[3] नन्दनः पुत्रः सन् [मनसिजतां][4] मनसिजत्वं[5] धत्तामि[6]। अग्रे आत्मन एव भूतः। इदानीं मानसः। अग्र च[7] नन्दनः तव[8] क्षोभात् हर्षकरो[9] मानसः[10]। हे तन्वि! [ते][11] तव भ्रूभ्यां धन्वी धनुष्मान् भवतु। तव सितैः स्मितैः[12] जैत्रा जयनशीला भल्ला[13] बाणा यस्य एवंविधः स्तात्। तथा त्वन्नेत्रे इव

---

1 P₁ नास्माक। 2 BP₂ पीयूषान्यमृ० 3 B बाणा 4 B तवाधरं ——॥१०५॥

1 P₁ प्लुष्टः। P₂ प्लुष्टः स्वैश्चापरोपैरिति। 2 P₁ om. बाणैः 3 B मनसो 4 P₁ om. मनसिजतां 5 P₂ नसिजवत्त्वं 6 B धत्ते 7 P₂ om. च 8 B बलभिवात्; P₁ लोभात् 9 P₁ करो 10 P₂ मनसः 11 BP₁P₂ om. ते; edn. add. ते 12 B श्वेतैः 13 B भल्लो ——

[4] संगाहृपत्योऽजनिचिदग्रजन्मा(ऽग्र)गण्यश्चाण्डूजनुषोऽनुजन्मा।
त्रैविद्यवृद्धार्चितसर्वदेवो बुधाग्रजन्मा महनीयजन्मा॥ ५॥

श्रीवैद्यनाथाभिधसूक्तदेवीपदप्रसादोपचितप्रसादैः।
पदैरुदाराकृतिभिः प्रक्लृप्तां क्वचित्क्वचिच्छोधयति स्म टी(१२४७)काम्॥६॥

इति [1]श्रीचाण्डूपण्डितविरचितायां
नैषध[दीपिकायां] टीकायां
[2]निसृष्टार्थनैषधो नाम
अष्टमः सर्गः समाप्तः॥[3]

4 P2 सम्राट्स्थपत्यजनि° —— ॥५॥

1 P1 महापण्डितश्री°; P2 om. —चाण्डूपण्डित° 3 B निसृष्टार्थनैषधो नाम
on the end. 3 B add. ग्रन्थसङ्ख्या—५०० ॥